
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः श्रीसीतारामचंद्राभ्यांनमः

(1)

१

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः श्रीसीतारामलक्ष्मणेभ्योनमः श्रीनं
दात्मनिधानं भवभयमथनं भानुकोटिप्रकाशं सत्तामात्रस्वरूपं निजपदगदितं योगिनां ध्या
नगम्यं ज्ञातं ज्ञेयं पुराणं सकलशिवसुखं कोटिचंद्रामृतांशुं वंदे रामं विशालं सकलमलं
हरं सच्चिदानंदरूपं १ सूत उवाच कदाचिन्नारदो योगी परानुग्रहवांछया पर्यटन्सकलाँ
ल्लोकान्मर्त्यलोकमुपागमत् १ तत्र दृष्ट्वा मूर्तिमद्भिः छंदोभिः परिवेष्टितं बालार्कप्रभया
सम्यग्भासयंतं सभागृहं २ मार्कंडेयादिमुनिभिः स्तूयमानं मुहुर्मुहुः सर्वार्थगोचरं ज्ञानं
सरस्वत्या समन्वितं ३ चतुर्मुखं जगन्नाथं भक्ताभीष्टफलप्रदं प्रणम्य दंडवद्भक्त्या तुष्टाव
संतुष्टः मुनिपुंगवः ४ प्रसन्नस्तं मुनिं प्राह स्वयंभूर्वेदवित्तमं किमिष्टकामस्त्वमसि तद्वदिष्यामि
ते मुने इत्याकर्ण्य वचस्तस्य मुनिर्ब्रह्माणमब्रवीत् ५ त्वत्तः श्रुतं मया सर्वं पूर्वमेव शुभाशुभं
६ इदानीमेकमेवास्ति श्रोतव्यं सुरसत्तम यद्रहस्यमपि ब्रूहि यदि तेनुग्रहो मयि ७ प्रा
प्ते कलियुगे घोरे नराः पुण्यविवर्जिताः दुराचाररताः सर्वे सत्यवार्तापराङ्मुखाः ८ पराप
वादनिरताः परद्रव्याभिलाषिणः परस्त्रीसक्तमनसः परहिंसापरायणाः ९ देहात्मदृष्ट
यो मूढा नास्तिकाः पशुबुद्धयः मातृपितृकृतद्वेषाः स्त्रीदेवाः कामकिंकराः १० विप्रा लोभ १

गृहस्थास्तावेदविक्रयजीविनः विद्यार्जनार्थमभ्यस्ताविद्यामदविमोहिताः ११ स्वत्यक्तस्व
जातिकर्माणः प्रायशः परवंचकाः क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागशीलिनः १२ त
द्वच्छूद्राश्च ये केचिद् ब्राह्मणाचाररतत्पराः स्त्रियश्च प्रायशो भ्रष्टा भर्त्रवज्ञाननिर्भयाः १३
श्वशुरद्रोहकारिण्यो भविष्यंति न संशयः एतेषां नष्टबुद्धीनां परलोकगतिर्भवेत् १४
इति चिंताकुलं चित्तं जायते मम संततं लघूपायेन येनैषां परलोकः कथं भवेत् १५ त
मुपायमुपाख्याहि सर्वं वेत्ति यतो भवान् इत्येवं वाक्यमाकर्ण्य प्रत्युवाचाब्जासनः १६
साधु पृष्टं त्वया साधो वक्ष्ये तच्छृणु सादरं पुरा त्रिपुरहंतारं पार्वती भक्तवत्सलं १७ श्रीरा
मतत्त्वं जिज्ञासुः पप्रच्छ विनयान्विता प्रियायै गिरिशस्तस्यै गूढं व्याख्यातवान् स्वयं पुरा
णोत्तममध्यात्मरामायणमिति स्मृतं तत् सा पार्वती जगद्धात्री पूजयित्वा दिवानिशं आलो
चयंती स्वानंदमग्नातिष्ठति सांप्रतं १९ प्रचरिष्यति लोके स्मिन्प्राण्यदृष्टवशाद्यदा नेर
तस्याध्ययनमात्रेण जना यास्यंति सद्गतिं २० तावद्विजृंभते पापं ब्रह्महत्यापुरःसरं
यावज्जगति नाध्यात्मरामायणमुदेष्यति २१ तावत्कलिर्महोत्साहो निःशंकस्तु प्रवर्तते

ति२

२ ते यावज्जगति नाध्यात्मरामायणमुदेष्यति २२ तावद्धर्मभटाः शूराः संचरिष्यंति निर्भ
याः यावज्जगति नाध्यात्मरामायणमुदेष्यति २३ तावत्सर्वाणि शास्त्राणि विवदंति पर
स्परं यावज्जगे नाध्यात्मरामायणमुदेष्यति २४ तावत्स्वस्वरूपे रामस्य दुर्बोधं महता
मपि यावज्जगति नाध्यात्मरामायणमुदेष्यति २५ अध्यात्मरामायणकीर्तनश्रवणा सं४
द्भवेत् फलं वक्तुं न शक्नोमि कार्त्स्न्येन मुनिपुंगव २६ तथापि तस्य माहात्म्यं वक्ष्ये किं
चित्तवानघ शृणु चित्तं समाधाय शिवेनोक्तं पुरा मम २७ अध्यात्मरामायणतः श्लो
कं श्लोकार्द्धमेव च यः पठेद्भक्तिसंयुक्तः स पापान्मुच्यते क्षणात् २८ यस्तु प्रत्यहमध्या
त्मरामायणमनन्यधीः यथाशक्ति पठेद्भक्त्या स जीवन्मुक्त उच्यते २९ यो भक्त्यार्चयतेऽ
ध्यात्मरामायणमतंद्रितः दिने दिनेऽश्वमेधस्य फलं तस्य भवेन्मुने ३० यदृच्छयापि यो
ध्यात्मरामायणमनादरात् अन्यतः शृणुयान्मर्त्यः सोऽपि पापैः प्रमुच्यते ३१ नमस्क
रोति योऽध्यात्मरामायणमदूरतः सर्वदेवार्चनफलं संप्राप्नोति न संशयः ३२ लिखि
त्वा पुस्तकेऽध्यात्मरामायणमुपोषतः यो रामभक्तः सदसि व्याकरोति नरोत्तमः ३३ तस्य २
बोद्धा रामभक्तेभ्यस्तस्य पुण्यफलं शृणु अधीतेषु च वेदेषु शास्त्रेषु व्याकृतेषु च यत्फलं दुर्लभं लोके तत्फलं तं
स्य संभवेत् एकादशीदिने ध्यात्मरामायणमुपोषितः ~~यो रामभक्तः सदसि व्याकरोति नरोत्तमः~~

पुण्यफलं वक्ष्ये शृणु वै सप्तम सत्तम प्रत्यक्षरं तु गायत्री पुरश्चर्य्याफलं लभेत् ३४ उपवास
व्रतं कृत्वा श्रीरामनवमीदिने रात्रौ जागरितो र्चित्य रामायणमनन्यधीः ३५ यः पठेच्छृ
णुयाद्वापि तस्य पुण्यं वदाम्यहं कुरुक्षेत्रादि निखिलपुण्यक्षेत्रेषु नैकशः ३६ आत्म
तुल्यधनेस्सूर्य्यग्रहणे सर्वतो मुखं विप्रेभ्यो व्यासतुल्येभ्यो दत्वा यत्फलमश्नुते ३७ त
त्फलं संभवेत्तस्य सत्यं सत्यं न संशयः योगापन्ते मुदाध्यात्मरामायणमनुव्रतैः ३८
श्रोतृं तस्य प्रतीक्षंते देवाइंद्रपुरोगमाः पठेत्सत्यहमध्यात्मरामायणमनुव्रतः ३९ पाप
करोति नकं यतन्नकोटिगुणं भवेत् तत्र श्रीरामहृदयं यः पठेत्सुसमाहितः स ब्रह्म
घ्नोपि पूतात्मा त्रिभिरेव दिनैर्भवेत् ४० श्रीरामहृदयं यस्तु हनुमत्प्रतिमांतिके त्रिःप
ठेत्सत्यहं मौनी स सर्वेप्सितभाग्भवेत् ४१ पठन् श्रीरामहृदयं तुलस्यश्वत्थयोर्यदि
प्रदक्षिणां प्रकुर्वीत ब्रह्महत्यां निवर्तयेत् ४२ श्रीरामगीतामाहात्म्यं कृत्स्नं जानाति शं
करः तदर्द्धं गिरिजा वेत्ति तदर्द्धं वेद्म्यहं मुने ४३ तन्ते किंचित्प्रवक्षामि कृत्स्नं वक्तुं न शक्य
ते यत्ज्ञात्वा तत्क्षणाल्लोकश्चित्तः शुद्धिमवाप्नुयात् ४४ श्रीरामगीतायत्सापं तनाश

तन्नेनश्यन्तितीर्थानिलोकेक्वापिकदाचन १

३ यतिनारद नैवपश्याम्यहंलोके मार्गमाणोपि सर्वदा ४५ रामेणोपनिषत्सिंधुमुन्मथ्यो
त्पादितांसुधां लक्ष्मणायार्पितांगीतासुधांपीत्वाऽमरोभवेत् ४६ जमदग्निसुतःपूर्वंका
र्तवीर्यवधेच्छया धनुर्विद्यामभ्यसितुंमहेशस्यांतिकेचसन् ४७ अधीयमानांपा
र्वत्यारामगीतांप्रयत्नतः श्रुत्वागृहीत्वाप्रपठन्नारायणकलामगात् ४८ ब्रह्महत्यादि
पापानांनिष्कृतिंयदिवांछति रामगीतांमासमात्रंपठित्वामुच्यतेनरः ४९ दुःप्रति
ग्रहदुर्भोज्यदुरालापादिसंभवं पापंसकृत्कीर्तनेनरामगीताविनाशयेत् ५० शालि
ग्रामशिलाग्रेतुतुलस्यश्वत्थयोरपि यतीनांपुरतस्तद्वद्रामगीतांपठेत्तुयः ५१ सत
त्फलमवाप्नोतियद्वत्तद्वापिनगोचरं रामगीतांपठन्भक्त्यायःश्राद्धेभोजयेद्द्विजान् त
स्यतेपितरःसर्वेयांतिविष्णोःपरंपदं ५२ एकादश्यांनिराहारोनियतोद्वादशीदिने
गस्र२ स्थित्वाऽगस्त्यतरोर्मूलेरामगीतांपठेत्तुयः ५३ सएवराघवःसाक्षात्सर्वदेवैश्चपू
ज्यते विनादानंविनाध्यानंविनातीर्थावगाहनं ५४ रामगीतांनरोऽधीत्यतदनंतफ
लंलभेत् बहुनाकिमिहोक्तेनशृणुनारदतत्त्वतः ५५ श्रुतिस्मृतिपुराणेतिहासा २

गमशतानि च अर्हन्ति नाल्पामध्यात्मरामायणकलामपि ५८ अध्यात्मरामचरितस्य मु
नीश्वराय माहात्म्यमेतदुदितं कमलासनेन यः श्रद्धया पठति वा शृणुयात्समर्त्यः प्रा
प्नोति विष्णुपदवीं सुरपूज्यमानः ५९ इति श्रीब्रह्मांडपुराणे उत्तरखंडे श्रीमदध्यात्मरा
मायणे प्रथमोऽध्यायः १ यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः संजातः
पृथिवीतले रविकुले मायामनुष्योऽव्ययः निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमा
द्यं स्थिरां कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे १ विश्वोद्भवस्थितिलया
दिषु हेतुमेकं मायाश्रयं विगतमायमचिंत्यमूर्तिं आनंदसांद्रममलं निजबोधरू
पं सीतापतिं विदिततत्त्वमहं नमामि २ पठंति ये नित्यमनन्यचेतसः शृण्वंति चा
ध्यात्मकसंज्ञितं शुभं रामायणं सर्वपुराणसंमतं निर्धूतपापा हरिमेव यांति ते ३
अध्यात्मरामायणमेव नित्यं पठेद्यदीच्छेद्भवबंधमोक्षं गवां सहस्रायुतकोटिदाने
फलं लभेद्यः शृणुयात्स नित्यं ४ पुरारिगिरिसंभूता श्रीरामार्णवसंगता अध्या
त्मरामगंगेयं पुनाति भुवनत्रयं ५ कैलासाग्रे कदाचिद्रविशतविमले मंदिरे रत्न

ग

४ पीठे संविष्टं ध्याननिष्ठं त्रिनयनमभयं सेवितं सिद्धसंघैः देवी वामांकसंस्था गिरिशवरतं
नया पार्वती भक्तिनम्रा प्राह देवं मीशं सकलभयहरं वाक्यमानंदकंदं ६ पार्वत्युवाच
ते नमोस्तु देव जगन्निवास सर्वात्मकत्वं परमेश्वरोसि पृच्छामि तत्त्वं पुरुषोत्तमस्य स
नातनत्वं च सनातनोसि ७ गोप्यं यदत्यंतमनन्यवाच्यं वदंति भक्तेषु महानुभावाः त
दप्यहोहं तव देव भक्ता प्रियोसि मे त्वं वद यत्तु पृष्टं ८ ज्ञानं सविज्ञानमथानुभक्तिवैराग्य
युक्तं च मितं विभास्वत् जानाम्यहं योषिदपि त्वदुक्तं यथा तथा ब्रूहि तरंति येन ९ पृच्छा
मि चान्यच्च परं रहस्यं तदेव चाग्रे वद वारिजाक्ष श्रीरामचंद्रेऽखिलतत्त्वसारे भक्तिर्दृढा
नौर्भवति प्रसिद्धा १० भक्तिः प्रसिद्धा भवमोक्षणाय नान्यत्ततः साधनमस्ति किंचित्
तथापि हृत्संशयबंधनं मे विभेत्तुमर्हस्यमलोक्तिभिस्त्वं ११ वदंति रामं परमेकमाद्यं निर
स्तमाद्यं निरस्तमायागुणसंप्रवाहं भजंति चाहर्निशमप्रमत्ताः परं पदं यांति तथैव सिद्धाः
१२ वदंति केचित्परमोपि रामः स्वाविद्यया संवृतमात्मसंज्ञं जानाति नात्मानमतः परेण ते
संबोधितो वेद परात्मतत्त्वं १३ यदि स्म जानाति कुतो विलापः सीताकृते तेन कृतः परे ४

ण जानाति नैवं यदि केन सेव्यः समोहितः सर्वैरपि जीवजातैः १४ अन्नोत्तरं किं विदितं भवद्भि
स्तद्ब्रूहि मे संशयभेदि वाक्यं श्रीमहादेव उवाच धन्यासि भक्तासि परात्मनस्त्वं यत् ज्ञातु
मिच्छा तव राम तत्त्वे १५ पुरा न केनाप्यभिचोदितोऽहं वक्तुं रहस्यं परमं निगूढं १५ त्वया
द्य भक्त्या परिचोदितोऽहं वक्ष्ये नमस्कृत्य रघूत्तमं ते रामः परात्मा प्रकृतेरनादिरानंद एकः
पुरुषोत्तमो हि १६ स्वमायया कृत्स्नमिदं हि सृष्ट्वा नभोवदंतर्बहिरास्थितो यः सर्वांतर
स्थोपि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे १७ जगंति नित्यं परितो भ्रमंति यत्सन्नि
धौ चुंबकलोहवद्धि एतन्न जानंति विमूढचेतसः स्वाविद्यया संवृतमानसा ये १८ स्वा
ज्ञानमप्यात्मनि शुद्धबोधे स्वारोपयंतीह निरस्तमाये संसारमेवानुसरंति ते वै पुत्रा
दि सक्ताः पुरुकर्मयुक्ताः १९ जानंति नैवं हृदये स्थितं वै चामीकरं कंठगतं यथाज्ञाः यथा
प्रकाशो न तु विद्यते रवौ ज्योतिः स्वभावात् परमेश्वरे तथा २० विशुद्धविज्ञानघने रघूत्तमे
ऽविद्या कथं स्यात् परतः परात्मनि यथा हि चाक्ष्णा भ्रमता गृहादिकं विनष्टदृष्टेर्भ्रमतीव दृ
श्यते २१ तथैव देहेंद्रियकर्तुरात्मनः कृतं परेऽध्यस्य जनो विमुह्यति नाहो न रात्रिः सवितुर्य

सीतयासहसुग्रीवलक्ष्मणाभ्यांसमन्वितः अयोध्यामगमद्रामोहनुमत्प्रमुखैर्वृतः ५

५

थाभवेत्स्वप्रकाशरूपाव्यभिचारिणः क्वचित् ज्ञानेनथाज्ञानमभिद्रष्टुर्हरौ रामेकथंस्थास्यति शुद्धचिद्घने तस्मात्परानंदमयेरघूत्तमेविज्ञानरूपेहिनविद्यतेतमः २३ अज्ञानसाक्षिण्यरविंदलोचनेमायाश्रयत्वान्नहिमोहकारणं २४ श्रीमहादेवउवाच अत्रतेकथयिष्यामिरहस्यमपिदुर्लभं सीतारामभरुत्सूनुसंवादंमोक्षसाधनं २५ पुरारामायणेरामोरावणंदेवकंटकं हत्वारणेरणश्लाघीसपुत्रबलवाहनं २६ अभिषिक्तःपरिवृतोवशिष्ठाद्यैर्महात्मभिः सिंहासनेसमासीनःकोटिसूर्यसमप्रभः २७ सीतयासहसुग्रीवलक्ष्मणाभ्यांसमन्वितः अयोध्यामगमद्रामोहनुमत्प्रमुखैर्वृतः २८ दृष्ट्वातदाहनूमंतंप्रांजलिंपुरतःस्थितं कृतकार्यंनिराकांक्षंज्ञानापेक्षंमहामतिं २९ रामःसीतामुवाचेदंब्रूहितत्वंहनूमते निष्कल्मषोयंज्ञानस्यपात्रंनोनित्यभक्तिमान् ३० तथेतिजानकीप्राहतत्वंरामस्यनिश्चितं हनूमतेप्रपन्नायसीतालोकविमोहिनी ३१ सीतोवाच रामंविद्धिपरंब्रह्मसच्चिदानंदमद्वयं सर्वोपाधिविनिर्मुक्तंसत्तामात्रमगोचरं ३२ आनंदंनिर्मलंशांतंनिर्विकारंनिरंजनं सर्वव्यापिनमात्मानंस्वप्रकाश

५

(10)

मकल्मषं ३३ मां विद्धि मूलप्रकृतिं सर्गस्थित्यंतकारिणीं तस्य सन्निधिमात्रेण सृजामीद
मतंद्रिता तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यतेऽबुधैः अयोध्यानगरे जन्म रघुवंशेऽ
तिनिर्मले विश्वामित्रसहायत्वं मखसंरक्षणं ततः अहिल्याशापशमनं चापभंगो म
हेशितुः ३६ मत्पाणिग्रहणं पश्चाद्भार्गवस्य मदक्षयः अयोध्यानगरे वासो मया द्वादश
वार्षिकः ३७ दंडकारण्यगमनं विराधवधएव च मायामारीचमरणं मायासीताहृति
स्तथा ३८ जटायुषो मोक्षलाभः कबंधस्य तथैव च शबर्याः पूजनं पश्चात् ~~कबंधस्य~~ सु
ग्रीवेण समागमः बालिनश्च वधः पश्चात्सीतान्वेषणमेव च सेतुबंधश्च जलधौ लं

१५९६

कायाश्च निरोधनं ४० रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः विभीषणे राज्यदा
नं पुष्पकेन मया सह ४१ अयोध्यागमनं पश्चाद्राज्ये रामाभिषेचनं एवमादीनि कर्मा
णि मयैवाचरितान्यपि ४२ आरोपयंति रामेऽस्मिन्निर्विकारेऽखिलात्मनि रामो न गच्छ
ति न तिष्ठति नानुशोचत्याकांक्षते त्यजति नो न करोति किंचित् आनंदमूर्तिरचलः परि
णामहीनो मायागुणाननुगतो हि तथा विभाति ४३ श्रीमहादेव उवाच ततो ॰मः स्वयं प्रा

ति रा

६

हहनुमंतमुपस्थितं शृणु तत्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनां ४४ आकाशस्य यथा भे
दस्त्रिविधो दृश्यते महान् जलाशये महाकाशस्तदवच्छिन्न एव हि ४५ प्रतिबिंबाख्य
मपरं दृश्यते त्रिविधं नभः बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णं तथापरं ४६ आभासस्त्वपरं
बिंबभूतमेवं त्रिधा चितिः साभासबुद्धेः कर्तृत्वमविच्छिन्नेविकारिणि ४७ साक्षिण्या
रोप्यते भ्रांत्या जीवत्वं च तथा बुधैः आभासस्तु मृषा बुद्धिरविद्या कार्यमुच्यते ४८ अ
विच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पितः अविच्छिन्नस्य पूर्णेन एकत्वं प्रतिपद्यते ४९
तत्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्म
नोः ५० तदाविद्या स्वकार्यैश्च नश्यत्येव न संशयः एतं विज्ञाय मद्भक्तो मद्भावायोप
पद्यते ५१ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यतां न ज्ञानं न च मोक्षः स्यात्तेषां ज
न्मशतैरपि ५२ इदं रहस्यं हृदयं ममात्मनो मयैव साक्षात्कथितं तवानघ मद्भक्तिहीना
य शठाय न त्वया दातव्यमैंद्रादपि राज्यतोधिके ५३ श्रीमहादेव उवाच एतत्तेभिहितं दे
वी श्रीरामहृदयं मया अतिगुह्यतमं भव्यं पवित्रं पापशोधनं ५४ साक्षाद्रामेण कथि
तं

६

(12)

तं सर्ववेदांतसंग्रहं यः पठेत्सततं भक्त्या स मुक्तो नात्र संशयः ५६ ब्रह्महत्यादिपापानि
बहुजन्मार्जितान्यपि नश्यंत्येव न संदेहो रामस्य वचनं यथा ५७ जातिभ्रष्टोतिपा
पी परधनपरदारेषु नित्योद्यतो वा स्तेयी ब्रह्मघ्नमातापितृवधनिरतो योगिवृंदापका
री यः संपूज्याभिरामं पठति च हृदयं रामचंद्रस्य भक्त्या योगींद्रैरप्यलभ्यं पदमपि ल
भते सर्वदेवैः सपूज्यः ५८ इति श्रीब्रह्मांडपुराणे उत्तरखंडे श्रीमदध्यात्मरामायणे उमा
महेश्वरसंवादे द्वितीयः सर्गः २ पार्वत्युवाच धन्यास्म्यनुगृहीतास्मि कृतार्थास्मि जग
त्प्रभो विच्छिन्नो मेऽतिसंदेहग्रंथिर्भवदनुग्रहात् १ त्वन्मुखाद्गलितं राम तत्त्वामृतरसा
यनं पिबंत्या मे मनो देव न तृप्यति भवापह २ श्रीरामस्य कथालेशः श्रुतं संक्षेपतो मया
३ इदानीं श्रोतुमिच्छामि विस्तरेण स्फुटाक्षरं ३ श्रीमहादेव उवाच शृणु देवि प्रवक्ष्या
मि गुह्याद्गुह्यतरं महत् अध्यात्मरामचरितं रामेणोक्तं पुरा मम ४ तदद्य कथयिष्यामि
शृणु तापत्रयापहं यच्छ्रुत्वा मुच्यते जंतुरज्ञानोत्थमहाभयात् ५ प्राप्नोति परमामृद्धिं
दीर्घायुः पुत्रसंततिं भूमिभारेण मग्ना दशवदनमुखाशेषरक्षोगणानां धृत्वा गोरूप

श्री

७ मादेो द्विजमुनिजनैः साकमब्जासनस्य गत्वा लोकं रुदंती व्यसनमुपगता ब्रह्म
णे प्राह सर्वं ब्रह्मा ध्यात्वा मुहूर्तं सकलमपि हरो वेद दुःशेषात्मकत्वात् ६ तस्मात्क्षी
रसमुद्रतीरमगमद्द्रुतमथ देवैर्नतो दृष्ट्वा चाखिललोकहृत्स्थमजरं सर्वज्ञमीशं ह
सिद्ध रिं असौ स्तौत्स्तुतिनिर्मलपदैः स्तोत्रैः पुराणोद्भवैर्भक्त्या गद्गदया गिरातिविमले सानंद
बाष्पप्लुतः ७ ततः स्फुरत्सहस्रांशुसहस्रसदृशप्रभः आविरासीद्धरिः प्राच्यां दि
शि व्यपनयन्तमः ८ कथंचिद्दृष्टवान्ब्रह्मा दुर्दर्शमकुतोमनो इंद्रनीलप्रतीकाशं
स्मितास्यं पद्मलोचनं ९ किरीटहारकेयूरकुंडलैः कटकादिभिः विभ्राजमानं श्रीव
त्सकौस्तुभप्रभयान्वितं १० स्तुवद्भिः सनकाद्यैश्च पार्षदैः परिवेष्टितं शंखचक्रगदा
पद्मवनमालाविराजितं ११ स्वर्णयज्ञोपवीतेन स्वर्णवर्णांबरेण च श्रिया भूम्या
च सहितं गरुडोपरि संस्थितं हर्षगद्गदया वाचा स्तोतुं समुपचक्रमे १२ ब्रह्मोवाच
नतोऽस्मि ते पदं देव प्राणबुद्धींद्रियात्मभिः [illegible]श्चिंत्यते कर्मपाशाद्धृदि नित्यं मुमुक्षुभिः
१३ मायया गुणमय्या त्वं सृजस्यवसि लुपसि जगदेतन्न तेन लेपः स्वानंदानुभवात्मनः ८

ध्यर्थ

१४ तथा शुद्धिर्न दुष्टानां दानाध्ययनकर्मभिः शुद्धात्मनां ते यशांसि सदा भक्तिमतां यथा
१५ अतस्त्वांघ्रिर्मे दृष्ट्वा त्वित्तदोषापनुत्तये [illegible]तां तदहृदये नित्यं मुनिभिः साधितैर्हृतः १६
ब्रह्माद्यैः स्वार्थसि[illegible]मस्माभिः पूर्वसेवितैः अपरोक्षानुभूत्यर्थं ज्ञानिभिर्हृदि भावितः
तवांघ्रिपूजानिर्माल्यतुलसीमालया विभो स्पर्द्धते वक्षसि पदं लब्ध्वापि श्रीः स
पत्निवत् १८ अतस्त्वत्पादभक्तेषु तव भक्तिः [illegible]ाधिका भक्तिमेवाभिवांछन्ति त्वद्भ
क्ताः सारवेदिनः अतस्त्वत्पादकमले भक्तिरेव सदास्तु मे संसारामयतप्तानां भेषजं
भक्तिरेव ते २० इति स्तुवन्तं ब्रह्माणं बभाषे भगवान् हरिः किं करोमीति तं वेधाः प्र
त्युवाचातिहर्षितः २१ भगवन् रावणो नाम पौलस्त्यतनयो महान् राक्षसानामधि
पतिर्मद्दत्तवरदर्पितः २२ त्रिलोकीं लोकपालांश्च बाधते विश्वकंटकः तस्य मृत्युर्म
नुष्येण मया कल्याण कल्पितः २३ अतस्त्वं मानुषो भूत्वा जहि देवरिपुं प्रभो श्रीभ
गवानुवाच कश्यपस्य वरो दत्तस्तपसा तोषितेन मे २४ याचितः पुत्रभावेन तथेति स
मीहितं मया स इदानीं दशरथो भूत्वा तिष्ठति भूतले २५ तस्याहं पुत्रतामेत्य कौश

15

८

स्यापां शुभे दिने। चतुर्द्धात्मानमेवाहं स्रजामी नरयोः पृथक् २६ योगमायापि सीते
ति जनकस्य गृहे तदा उत्पत्स्यते तया सार्द्धं सर्वं संपादयाम्यहं २७ इत्युक्त्वांतर्दधे
विष्णुर्ब्रह्मा देवानथाब्रवीत् विष्णुर्मानुषरूपेण भविष्यति रघोः कुले २८ यूयमं
शेष्वं सर्वेपि वानरेष्वंशसंभवान् विष्णोः साहाय्यं कुरुत यावत्स्थास्यति भूतले २९
इति देवान् समादिश्य समाश्वास्य च मेदिनी ययौ ब्रह्मा स्वभवने विज्वरः सुखमास्थि
तः ३० देवाश्च सर्वे हरिरूपधारिणः स्थिताः सहायार्थमितस्ततो हरेः महाबलाः प
र्वतवृक्षयोधिनः प्रतीक्षमाणा भगवंतमीश्वरं ३१ इति श्रीब्रह्मांडोत्तरकांडे श्री
मदध्यात्मरामायणे उमामहेश्वरसंवादे द्वितीयः सर्गः २ अथ राजा दशरथः
श्रीमान्सत्यपराक्रमः अयोध्याधिपतिः वीरः सर्वलोकेषु विश्रुतः १ सोनप
त्यदुःखेन पीडितो गुरुमेकदा वशिष्ठं मुनिशार्दूलमभिवाद्येदमब्रवीत् २ स्वामिन्गु
रोः कथं मे स्युः सर्वलक्षणलक्षिताः पुत्रहीनस्य मे राज्यं सर्वं दुःखाय कल्पते ३ ततोऽ
ब्रवीद्वसिष्ठस्तं भविष्यंति सुतास्तव चत्वारः सत्वसंपन्ना लोकपाला इवापराः ४ सा

८

ऋष्यशृंगं तपोधनं अस्माभिः सहितः पुत्रकामेष्टिं शीघ्रमाचर तथेति मुनिमानीय ५

तोभर्त्तो रमानीयमंत्रिभिः सहितः शुचिः यज्ञकर्म समारेभे मुनिभिर्वीतकल्मषैः ६
श्रद्धयाहूयमानेन तत्र प्रजांबूनदप्रभः पायसंपूर्णपात्रस्थं गृहीत्वोवाच हव्यवाट् ७
गृहाण पायसं दिव्यं पुत्रीयं देवनिर्मितं लप्स्यसे परमानंदं पुत्रत्वेन न संशयः ८
इत्युक्त्वा पायसं दत्वा राज्ञे सोंऽतर्दधेनलः एवं देवमुनिशार्दूलै राजा लब्धमनोरथः ९
वशिष्ठऋष्यशृंगाभ्यामनुज्ञातो ददौ हविः कौशल्यायै सकैकेय्या अर्द्धमर्द्धं प्रयत्न
तः १० ततः सुमित्रा संप्राप्ता जगृहे पौरुषं चरुं कौशल्या तु स्वभागार्द्धं ददौ तस्यै मुदा
न्विता ११ कैकेई च स्वभागार्द्धं ददौ प्रीतिसमन्विता उपभुज्य चरुं सर्वाः स्त्रियो गर्भ
समन्विताः १२ देवता इव तारेजुः स्वभासा राजमंदिरे दशमे मासि कौशल्या सुषुवे
पुत्रमद्भुतं १३ मधुमासे सिते पक्षे नवम्यां कर्कटे शुभे पुनर्वसुर्क्षसहिते उच्चस्थे ग्र
हपंचके १४ मेषं पूषणि संप्राप्ते पुष्पवृष्टिसमाकुले आविरासीज्जगन्नाथः परमात्मा
सनातनः १५ नीलोत्पलदलश्यामः पीतवासाश्चतुर्भुजः जलजारुणनेत्रांतः स्फुर

२ कुंडलमंडितः १६ सहस्रार्कप्रतीकाशभ्रूकुटीकुटिलालकः शंखचक्रगदापद्मवन
मालाविराजितः १७ अनुग्रहार्थहसितैर्दसच्चित्तस्मितचंद्रिकः करुणारससंपूर्णवि
शालोत्पललोचनः १८ श्रीवत्सहारकेयूरनूपुरादिविभूषणः दृष्ट्वा तं परमात्मानं कौश
ल्याविस्मयाकुला १९ हर्षपूर्णाश्रुनयना नत्वा प्रांजलिरब्रवीत् कौशल्योवाच देव
देव नमस्तेस्तु शंखचक्रगदाधर २० परात्मन्नच्युतोऽनंत पूर्ण त्वं पुरुषोत्तम वदंत्यगो
चरं वाचा बुद्ध्यादीनामतींद्रियं २१ त्वां वेदवादिनः सत्तामात्रं ज्ञानैकविग्रहं त्वमेव माय
या विश्वं सृजसेवसि हंसि च २२ सत्वादिगुणसंयुक्तः स्तुर्य एवामलः सदा करोषीव
न कर्ता त्वं गच्छन्नपि न गच्छसि २३ न शृणोषि शृणोषीव पश्यन्निव न पश्यसि अप्रा
णो ह्यमनाः शुद्ध इत्यादि श्रुतिरब्रवीत् २४ समः सर्वेषु भूतेषु तिष्ठन्नपि न लक्ष्यसे
अज्ञानध्वांतचित्तानां व्यक्त एव सुमेधसां २५ शरीरे तव दृश्यंते ब्रह्मांडाः परमाणवः
त्वं ममोदरसंभूत इति लोकान्विडंबसि २६ भक्तेषु पारवश्यं ते दृष्टं मे रघूत्तम संसा
रसागरे मग्ना पतिपुत्रगृहादिषु २७ भ्रमामि ~~[illegible]~~ मायया ते पादमूलमुपागता २

देव त्वद्रूपमेतन्मे सदा तिष्ठतु मानसे २८ आवृणोतु न मां माया तव विश्वविमोहिनी उ
पसंहर विश्वात्मन्नेतद्रूपमलौकिकं २९ दर्शयस्व महानंदबालभावं सुकोमलं ल
लितालिंगनालापैस्तरिष्याम्युत्कटं तमः ३० श्रीभगवानुवाच यद्यदिष्टं त्वया रूपं
तत्तद्भवतु नान्यथा अहं तु ब्रह्मणा पूर्वं भूमिभारापनुत्तये ३१ प्रार्थितो ब्रह्मणा पूर्वं
~~भूमिभारापनुत्त~~ये मानुषत्वमुपागतः त्वया दशरथेनाहं तपसाराधितः पुरा मत्पुत्र
त्वाभिकांक्षिण्या तथा कृतमनिंदिते रूपमेतत्त्वया दृष्टं प्राक्तनेन तपःफलं ३३ मद्दर्श
नं विमोक्षाय कल्पते ह्यन्यदुर्लभं संवादमावयोर्यस्तु पठेद्वा शृणुयादपि ३४ स याति
मम सारूप्यं मरणे मत्स्मृतिं लभेत् इत्युक्त्वा मातरं रामो बालो भूत्वा रुरोद ह ३५ बाल
त्वेपींद्रनीलाभो विशालाक्षोतिसुंदरः बालारुणप्रतीकाशो लालिताखिललोकपः ३६
अथ राजा दशरथः श्रुत्वा पुत्रोद्भवोत्सवं आनंदार्णवमग्नोसावाययौ गुरुणा सह ३७
रामं राजीवपत्राक्षं दृष्ट्वा हर्षाश्रुसंप्लुतः गुरुणा जातकर्माणि कर्तव्यानि चकार सः ३८ कै
केयी चाथ भरतमसूत कमलेक्षणं सुमित्रायां यमौ जातौ पूर्णेंदुसदृशाननौ ३९ तदाग्रा

१० मत्सहस्राणि ब्राह्मणेभ्यो ददौ मुदा सुवर्णानि च रत्नानि वासांसि सुरभीः शुभाः ४० यस्मिन्नुर
मे ते मुनयो विप्रपार्ह्यानेपथ्यपूर्वे तेगुरुः प्राह रामेति रमणाद्राम इत्यपि ४१ भरणाद्भरतं
नाम लक्ष्मणं लक्षणान्वितं शत्रुघ्नं शत्रुहंतारं एवं गुरुरभाषत ४२ लक्ष्मणो राम
चंद्रेण शत्रुघ्नो भरतेन च द्वंद्वीभूय चरंतौ तौ पायसांशानुसारतः ४३ रामस्तु लक्ष्मणे
नाथ विचरन् बाललीलया रमयामास पितरौ चेष्टितैर्मुग्धभाषितैः ४४ भाले स्वर्ण
सूयाश्वत्थपर्णं मुक्ताफलान्वितं कंठे रत्नमणिव्रातं मध्ये द्वीपिनखान्वितं ४५ कर्णयोः
स्वर्णसंपन्नरत्नान्वितसुकुंडलं शिंजानमणिमंजीरकटिसूत्रांगदैर्युतं ४६ स्मितवक्त्रा
ल्पदशनमिंद्रनीलमणिप्रभं अंगणे रममाणं तं बालकानुसर्वतः ४७ दृष्ट्वा दशरथो
राजा कौशल्या मुमुदे तदा भोक्ष्यमाणो दशरथो राममेहीति चासकृत् ४८ आहूयत्य
तिहर्षेन प्रेम्णा नायाति लीलया आनयेति च कौशल्यामाह सा सस्मिता सुतं ४९
धावत्यपि न शक्नोति स्प्रष्टुं योगिमनोगतं प्रहसन्स्वयमायाति कर्दमांकितपाणिना
ता ५० किंचिद्गृहीत्वा कवलं पुनरेव पलायते एवमानंदसंदोहजगदानंदकारकः ५१ मा

२०

याबल्यैर्वपुर्दृष्ट्वा रमयामास दंपती कौशल्या जननी तस्य माल्लिमाल्लिप्रकुर्वती ५२ या
यनानि विचित्राणि स्खलेलेस चेलालयन् आदपान्मोदकान्लोलो कर्णशष्कुलिकास्त
था ५३ कर्णपूरांश्च विविधान्वर्षवृद्धे च वायने गृहकार्य्ये तयासक्ते तस्य चापल्यकार
णात् ५४ एकदा रघुनाथो सो गतो मातरमंतिके भोजनं देहि मे मातर्नन्नं भुनं कार्य्यसक्ते
या ५५ तदा क्रोधेन भांडानि लकुटेनाहनेत्ततः शिक्यस्थं पातयामास गव्यं च नवनी
तकं ५६ लक्ष्मणाय ददौ रामो भरताय यथाक्रमं शत्रुघ्नाय ददौ पश्चात् दधियैर्दुग्धं तथै
व च ५७ रुदन् कश्चित्ते माता हास्यं कृत्वा प्रधावती आगतां तां विलोक्याथ ततः सर्वे प
लायिताः ५८ कौशल्या धावमानापि प्रस्खलंती पदे पदे रघुनाथं करे धृत्वा किंचि
न्नो वाच भामिनी बालभावे समाश्रित्य मंदं मंदं रुरोद ह ते सर्वे लालिता मात्रा गाढमा
लिंग्य यत्नतः ५९ अथ कालेन ते सर्वे कौमारं प्रतिपेदिरे उपनीता वशिष्ठेन सर्वविद्या
विशारदाः ६० लक्ष्मणश्च सदा राममनुगच्छति सादरं सेव्यसेवकभावेन शत्रुघ्नो भरतं
तथा ६१ रामश्चापधरो नित्यं तूणी बाणान्वितः प्रभुः अश्वारूढो वनं याति मृगयायै स

धनुर्वेदे च निरताः सर्वशास्त्रार्थवेदिनः बभूवुर्जगतां नाथाः लीलया नररूपिणः २

११ लक्ष्मणः हत्वा दुष्टमृगान्नित्यं मित्रैः सर्वैर्न्यवेदयत् प्रातरुत्थाय सुस्नातः पितरावभिवन्द्य च ६३ पौरकार्याणि सर्वाणि करोति विनयान्वितः बंधुभिः सहितो नित्यं भुक्त्वा मुनिभिरन्वहं ६४ धर्मशास्त्ररहस्यानि शृणोति व्याकरोति च एवं परात्मा मनुजावतारो मनुष्यलोकाननुसृत्य सर्वं चक्रेऽविकारी परिणामहीनो विचार्यमाणो न करोति किंचि-

त् ६५ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे तृतीयः सर्गः ३ कदाचित्कौशिकोऽभ्यागा-

दयोध्यां ज्वलनप्रभः द्रष्टुं रामं परात्मानं जातं ज्ञात्वा स्वमायया १ दृष्ट्वा दशरथो राजा प्रत्युत्थायाचिरेण तु वसिष्ठेन समागम्य पूजयित्वा यथाविधि २ प्रत्युत्थाय मुनिं राजा प्रांजलिर्भक्तिनम्रधीः कृतार्थोऽस्मि मुनीन्द्राहं त्वदागमनकारणात् ४ त्वद्विधा यद्गृहं यान्ति तत्रैवायान्ति संपदः यदर्थमागतोऽसि त्वं ब्रूहि सत्यं करोमि तत् ५ विश्वामित्रोऽपि तं प्रीतः प्रत्युवाच महामतिः अहं पर्वणि संप्राप्ते दृष्ट्वा यजे सुरान्पितॄन् ६ यदारभे तदा दैत्या विघ्नं कुर्वन्ति नित्यशः मारिचिश्च सुबाहुश्च परे चानुचरास्तयोः ७ अतस्तयोर्वधार्थाय ज्येष्ठं रामं प्रयच्छ मे लक्ष्मणेन सह भ्रात्रा तव श्रेयो भविष्यति ११

८ वशिष्ठेन सहाऽस्माभिर्यदीयतो यदि रोचते पप्रच्छ गुरुमेकान्ते राजा चिंतापरायणः
८ किं करोमि गुरो रामं त्यक्तुं नोत्सहते मनः बहुवर्षसहस्रान्ते कष्टेनोत्पादिताः सुताः
९ चत्वारोऽमरतुल्यास्तेषां रामोऽतिवल्लभः रामो यदा गच्छति चेन्न जीवामि कथं
चन १० प्रख्यातो यदि मुनिः शापं दास्यत्यसंशयं कथं श्रेयो भवेन्मह्यमसत्यवाग
पिनस्य शेत ११ वशिष्ठ उवाच शृणु राजन् देवगुह्यं गोपनीयं प्रयत्नतः रामो न मानुषो
जातो परमात्मा सनातनः भूमेर्भारावतराय ब्रह्मणाभ्यर्थितः पुरा १२ स एव जातो भ
वने कौशल्यायास्तवानघ त्वं तु प्रजापतिः पूर्वं कश्यपो ब्रह्मणः सुतः १३ कौशल्या चादि
तिर्देवमाता पूर्वं यशस्विनी भवंतौ तप उग्रं वै तेपाते बहुवत्सरं १४ अग्राम्यविषयो
विष्णुपूजाध्यानैकतत्परौ १५ तदा प्रसन्नो भगवान्वरदो भक्तवत्सलः वृणीष्व वरमि
त्युक्ते त्वं मे पुत्रो भवामल १६ इति त्वया याचितो सौ भगवान् भूतभावनः तथेत्युक्त्वाद्य पु
त्रत्वं जातो रामः सत्यवित् १७ शेषस्तु लक्ष्मणो राजन् राममेवान्वपद्यत जातौ भरतश
त्रुघ्नौ शंखचक्रे गदाभृतः १८ योगमायापि सीतेति जाता जनकनंदिनी विश्वामित्रोपि

रामायनयायोजितुमागतः १९ एतच्छ्रुत्वा नमं राजन्नैवेत्तव्यं करोचन अतःप्रीतेनमन
सा पूजयित्वाथ कौशिकं २० प्रेषयस्व रमानाथं रामं च सहलक्ष्मणं वशिष्ठेनेवमुक्तः सु
राजा दशरथस्तदा २१ लेनतके समिवात्मानं मेने प्रमुदितो नरः आहूय रामरामेति ल
क्ष्मणेति च सादरं २२ आलिंग्य मूर्ध्न्यवघ्राय कौशिकाय समर्पयत् ततोग्नि हस्तो भग
वान्विश्वामित्रप्रतापवान् २३ आशीर्भिरभिनंद्याथ राजा तौ रामलक्ष्मणौ गृहीत्वा
चापतूणीरबाणखड्गधरावुभौ २४ किंचिद्देशमतिक्रम्य राममाहूय भक्तितः ददौ
बलां चातिबलां विद्यां देवनिर्मिते २५ ययोर्ग्रहणमात्रेण क्षुत्क्षामादिर्न जायते ततउत्ती मा
र्यगंगां ते ताटकावनमागमन् २६ विश्वामित्रस्तदा प्राह रामं सत्यपराक्रमं अत्रास्ति
ताटिका नाम राक्षसी कामरूपिणी २७ बाधते लोकमखिलं जहि तामविचारयन् त
थेति धनुरारोप्य सगुणं रघुनंदनः २८ टंकारमकरोत्तेन शब्देनापूरयन्वनं तच्छ्रुत्वा
सहसा नादं ताटका घोररूपिणी २९ कोपसंमूर्छिता राममभिद्रावमेघवत् ता
मेकेन शरेणाशु ताडयामास वक्षसि ३० पपात विपिने घोरं वमंती रुधिरं बहु ततो १२

दु२

त्ति सुंदरी यक्षी सर्वाभरणभूषिता शापाद्विनिर्गता चैनोप्राप्ता मुक्ता रामप्रसादतः ततो
रामं परिक्रम्य गता रमाशेयादिवं ३२ ततो त्ति हृष्टो परिरभ्य रामं मूर्द्धनमाघ्राय वि
चिंत्य किंचित् सर्वास्त्रजालं सरहस्यमंत्रं प्रीत्याभिरामाय ददौ स कौशिकः ३३ इति
श्रीमदध्यात्मरामायणे बालकांडे चतुर्थः सर्गः ४ ततो कामाश्रमे रम्ये कानने मुनिसंकु
ले उषित्वा रजनीमेकां प्रभाते प्रस्थितः शनैः १ सिद्धाश्रमं गताः सर्वे सिद्धचारणसेवि
ते विश्वामित्रेण संदिष्टा मुनयः सांतिवासिनः २ पूजां च महतीं चक्रू रामलक्ष्मणयोर्द्रुतं
श्रीरामः कौशिकं प्राह मुने दीक्षां प्रविश्य तां ३ दर्शयस्व महाभाग कुतस्तौ राक्षसाधमौ त
थेत्युक्त्वा मुनिर्यष्टुमारेभे मुनिभिः सह ४ ऋत्विजस्तु कृतौ तस्मिन सहस्राण्येकविंशति कु
लीनाः संमताः सर्वे वेदशास्त्रार्थपारगाः ५ मध्याह्ने ददृशाते तौ राक्षसौ कामरूपिणौ मा
रीचश्च सुबाहुश्च वर्षंतौ रुधिरास्थिनी ६ रामोपि धनुरादाय द्वौ बाणौ संदधे सुधीः आ
कर्णांतं समाकृष्य विससर्ज तयोः पृथक् ७ तयोरेकं तु मारीचं भ्रामयन् शतयोज

ने पातयामास जलधौ तदद्भुतमिवाभवत् ८ द्वितीयोऽग्निमयो बाणः सुबाहुमथ वक्ष
स्सणात् अपरे लक्ष्मणेनाथ हतादनुजयोऽधिनः ९ पुष्पौघैराकिरन्देवा राघवे स
हलक्ष्मणं दिवि दुंदुभयो नेदुस्तुष्टुवुः सिद्धचारणाः १० विश्वामित्रस्तु संपूज्य पूजा
र्हं रघुनंदनं अंके निवेश्य चालिंग्य भक्त्या बाष्पाकुलें [illegible] क्षणः ११ विश्वामित्र
उवाच शृणु राम जगन्नाथ सर्वसिद्धिप्रदायक विश्रांतिं कुरु सेद वकिंचित्कालं
मयासह १२ श्रीराम उवाच तव प्रसादाद्भो देव स्थास्यामि भवदंतिके इत्युक्त्वा रघुना
थोसौ विश्वामित्रेण संयुतः १३ भोजयित्वा सहभ्रात्रा रामं पक्वफलादिभिः पुराणवा
क्यैर्मधुरैर्निनाय दिवसत्रयं १४ चतुर्थेऽह्नि संप्राप्ते कौशिको राममब्रवीत् राम
राम महायज्ञं द्रष्टुं गच्छामहे वयं १५ विदेहराजनगरं जनकस्य महात्मनः तत्र मा
हेश्वरं चापमस्ति न्यस्तं पिनाकिना १६ द्रक्ष्यसि त्वं महासत्वं पूज्यसे जनकेन च
इत्युक्त्वा स मुनिस्ताभ्यां ययौ गंगासमीपगं १७ गौतमस्याश्रमे पुण्ये यत्राहल्या

दृष्ट्वोवाच मुनिं श्रीमान् रामो राजीवलोचनः कस्येतदाश्रमपदं भाति भास्वच्छुभं महत् पत्रपुष्पफलैर्युक्तं जंतुभिः परिवर्जितं २

।स्थितः तपः स्थिप्यपुष्पफलोपेतं पादपैः पक्षिये स्थितं १९ मृगपक्षिगणैर्हीनं नानापक्षिविवर्जि
तं आल्हादयति मे चेतो भगवन्ब्रूहि तत्त्वतः १९ विश्वामित्र उवाच शृणु राम पुरा ह्यत्र
गौतमो लोकविश्रुतः सर्वधर्मभृतां श्रेष्ठस्तपसाराधयद्धरिं २० तस्मै ब्रह्माददौ कन्यां
महल्यां लोकसुंदरीं ब्रह्मचर्येण संतुष्टः शुश्रूषणपरायणां २१ तया सार्द्धमिहावासी
द्गौतमस्तपतां वरः शक्रस्तु तां धर्षयितुं मंतरिमिमे पुरन्वहं २२ दृष्ट्वायांतं स्वरूपेण मुनिः
परमकोपनः पप्रच्छ के त्वं दुष्टात्मन्मम रूपधराधम २३ सत्यं ब्रूहि न चेद्भस्म करि
ष्यामि न संशयः सोब्रवीद्देवराजोहं पाहि मां काममोहितं २४ हृतेंद्रं जुगुप्सितं कर्मम
याकुत्सितचेतसा गौतमः क्रोधताम्राक्षः शशाप दिविजाधिपं २५ योनिस्त्वं पद दुष्टा
त्मन्सहस्रभगवान्भव शप्त्वा तं देवराजानं प्रविश्य स्वाश्रमं द्रुतं २६ दृष्ट्वाहल्यां वेपमा
नां प्रांजलिर्गौतमोब्रवीत् दुष्टे त्वं तिष्ठ दुर्वृत्ते शिलायामाश्रमे मम २७ निराहारादि
वारात्रं तपः परममास्थिता आतपानिलवर्षादिसहिष्णुः परमेश्वरे २८ ध्यायंती

७ कदाचिन्मुनिवेषेण निर्गते गौतमे महेंद्रोधर्षयित्वा च निरगात्त्वरितं मुनिरप्यगात्

१४ राममेकाग्रमनसा हृदिसंस्थितं तपाप्रसादितोभर्ताशापशांतिःकदाभवेत् गौतमउवा
च रामोदाशरथिर्भूत्वायागमिष्यतिभूतले शापस्यांतोभवेद्द्वैपादस्पर्शोभवेद्यदा ना
नाजैतुविहीनोयंमाश्रमोमेभविष्यति एवंवर्षसहस्रेषुवनेषुपवनेषुच रामोदाशर
थिःश्रीमानागमिष्यतिसानुजः यदातवाश्रमंशिलांपादाभ्यामाक्रमिष्यति ३२ तदैव
त्रि धूतपापात्वंरामंसंपूज्ययत्नतः परिक्रम्यनमस्कारंकृत्वाशापाद्विमुच्यसे ३३ पूर्ववन्म
मशुश्रूषांकरिष्यतियथासुखं इत्युक्त्वागौतमःप्रागाद्धिमवंतंनगेश्वरं ३४ तदाप्यहिल्या
भूतानामदृश्यास्वाश्रमेशुभे तवपादरजःस्पर्शंकांक्षतेपापनाशनं ३५ आस्तेद्यापिरघु
श्रेष्ठतपोदुष्करमास्थिता पावयस्वमुनेर्भार्यामहिल्यांब्रह्मणःसुतां ३६ इत्युक्त्वाराघवं
हस्तेगृहीत्वामुनिपुंगवः दर्शयामासचाहिल्यामुग्रेणतपसावृतां ३७ रामःशिलांप
दास्पृष्ट्वातांचापश्यत्तपोधनां ननामराघवोहिल्यांरामोहमितिचाब्रवीत् ३८ ततो
दृष्ट्वारघुश्रेष्ठंपीतकौशेयवाससं धनुर्बाणधरंरामंलक्ष्मणेनसमन्वितं ३९ रामः १४

(28)

चतुर्भुजं शंखचक्रगदापंकजधारिणं २

शिलां पदा स्पृष्ट्वा तां चापश्यत्तपोधनां । ननाम राघवोऽहल्यां रामोऽहमिति चाब्रवीत् ॥ ४० ॥ ततो
दृष्ट्वा रघुश्रेष्ठं पीतकौशेयवाससं । धनुर्बाणधरं रामं लक्ष्मणेन समन्वितं ॥ ४१ ॥ स्मितवक्त्रं
पद्मनेत्रं श्रीवत्सांकितवक्षसं । नीलमाणिक्यसंकाशं द्योतयंतं दिशो दश ॥ ४२ ॥ दृष्ट्वा रामं
रमानाथं हर्षविस्फारितेक्षणा । गौतमस्य वचः स्मृत्वा ज्ञात्वा नारायणं परं ॥ ४३ ॥ संपूज्य वि
धिवद्रामम् अर्घ्यादिभिरनिंदिता । हर्षाश्रुजलनेत्रांता दंडवत्प्रणिपत्य सा ॥ ४४ ॥ उत्थाय च
पुनर्दृष्ट्वा रामं राजीवलोचनं । पुलकांकितसर्वांगा गिरा गद्गदयेलत ॥ ४५ ॥ अहल्योवाच
५सं ग्न अहो कृतार्थास्मि जगन्निवास ते पदाब्जसंलग्नरजःकणादहं । स्पृशामि यत्पद्मजशंक न
रादिभिर्विमृश्यते रंधितमानसैः सदा ॥ ४६ ॥ अहो विचित्रं तव राम चेष्टितं मनुष्यभा
वेन विमोहितं जगत् । चलस्यजस्रं चरणादिवर्जितः संपूर्ण आनंदमयोतिमायिकः ॥ ४७ ॥
यत्पादपंकजपरागपवित्रगात्रा भागीरथी भवविरंचिमुखान्पुनाति । साक्षात्स एव मम
दृग्विषयो यदास्ते किं वर्ण्यते मम पुराकृतभागधेयं ॥ ४८ ॥ मर्त्यावतारे मनुजाकृतिं हरिं

माभिधेयं रमणीयकीर्तिं धनुर्द्धरं पद्मपलाशलोचनं भजामि नित्यं परमं परायणं ४९ य
त्पादपंकजामृतं श्रुतिभिर्विमृग्यं यन्नाभिपंकजभवः कमलासनश्च यन्नामसाररसि

ग

कोस्य भवेत्पुरारिस्तं राममचेद्रमनिशं हृदि भावयामि ५० यस्यावतारचरितानि विरिंचि
लोके गायंति नारदमुखा भवपद्मजाद्याः आनंदजाश्रुपरिषिक्तकुचाग्रसीमा वा
गीश्वरी च तमहं शरणं प्रपद्ये ५१ सोयं परात्मा पुरुषः पुराणः सर्वः स्वयंज्योतिरनंत
आद्यः मायातनुं लोकविमोहिनीं यो धत्ते परानुग्रह एष रामः ५२ अयं हि विश्वोद्भव
संयमानामेकः स्वमायागुणबिंबितो यः ~~अयं हि विश्वोद्भवसंभ~~विरिंचाविष्ण्वीश्वरना

वी

मभेदान् धत्ते स्वतंत्रः परिपूर्ण आत्मा ५३ नमोस्तु ते राम तवांघ्रिपंकजं श्रिया धृतं व
क्षसि लालितं प्रिया आक्रांतमेकेन जगत्त्रयं पुरा ध्येयं मुनींद्रैरभिमानवर्जितैः ५४
जगतामादिभूतस्त्वं जगत्त्वं जगदाश्रयः सर्वभूतेष्वसंसक्तो ऽनेको भाति भवान्परः ५५
ॐकारवाच्यस्त्वं रामो वाचामविषयः पुमान् वाच्यवाचकभेदेन भवानेव जगन्मयः ५६

कार्य्यकारणकर्तृत्वफलसाधनभेदतः एको विभासि राम त्वं मायया बहुरूपया ५७
त्वन्मायामोहितधियस्त्वां न जानंति तत्त्वतः मानुषं त्वाभिमन्यंते मायिनं परमेश्व
रं ५८ आकाशवत्त्वं सर्वत्र बहिरंतर्गतोऽमलः असंगो ह्यचलो नित्यः शुद्धो बुद्धः स
दाव्ययः ५९ योषिन्मूढाहमज्ञा ते तत्त्वं जाने कथं विभो तस्मात्ते शतशो राम नमस्कुर्या
५ दे मनन्यधीः ६० देव मे यत्र कुत्रापि स्थिताया अपि सर्वदा त्वत्पादकमले सक्ता भक्तिरेव
सदास्तु मे ६१ नमस्ते पुरुषाध्यक्ष नमस्ते भक्तवत्सल नमस्तेस्तु हृषीकेश नारायण न
मोस्तु ते ६२ भवभयहरमेकं भानुकोटिप्रकाशं करधृतशरचापं कालमेघावभासं
कनकरुचिरवस्त्रं रत्नवत्कुंडलाढ्यं कमलविशदनेत्रं सानुजं राममीडे ६३ स्तुत्वैवं पुरु
षं साक्षाद्राघवं पुरतः स्थितं परिक्रम्य प्रणम्याशु सानुज्ञाता ययौ पतिं ६४ अहिल्य
या कृतं स्तोत्रं यः पठेद्भक्तिसंयुतः समुच्यतेऽखिलैः पापैः परं ब्रह्माधिगच्छति ६५ पुत्रा
र्थे यः पठेद्भक्त्या रामं हृदि निधाय च संवत्सरेण लभते वंध्याप्यपि पुत्रकं ६६ सर्वान्का

१६

मानवाप्नोति रामचंद्रप्रसादतः॥६५॥ब्रह्मघ्नो गुरुतल्पगोऽपि पुरुषस्तेयी सुरापोऽपि वा मा
तृभ्रातृविहिंसकोऽपि सततं भोगैकबद्धातुरः॥ नित्यं स्तोत्रमिदं जपन् रघुपतिं भक्त्या हृदिस्थं
स्मरन् ध्यायन्मुक्तिमुपैति किं पुनरसौ स्वाचारयुक्तो नरः॥६६॥इति श्रीमदध्यात्मरामायणे
बालकांडे उमामहेश्वरसंवादे पंचमः सर्गः॥५॥महादेव उवाच विश्वामित्रोऽथ तेनाह राघ
वौ सहलक्ष्मणं॥ गच्छामो वत्स मिथिलां जनकेनाभिपालितां॥ दृष्ट्वा क्रतुवरं पश्चाद
योध्यां गंतुमर्हसि॥ इत्युक्त्वा प्रययौ गंगामुनीर्यः सहराघवौ॥२॥ विदेहस्य पुरः प्राप्ता ऋ
षिवाटं समाविशन्॥ प्राप्तं कौशिकमाकर्ण्य जनको ऽति मुदान्वितः॥३॥ पूजाद्रव्याणि सं
गृह्य सोपाध्यायः समाययौ॥ दंडवत्प्रणिपत्याथ पूजयामास कौशिकं॥४॥ पप्रच्छ रा
घवौ दृष्ट्वा सर्वलक्षणलक्षितौ॥ द्योतयंतौ दिशः सर्वाः सूर्यचंद्राविवापरौ॥५॥ कस्यै
तौ नरशार्दूलौ पुत्रौ देवसुतोपमौ॥ मनःप्रीतिकरौ मेऽद्य नरनारायणाविव॥६॥ प्रत्युवा
च मुनिः प्रीतो हर्षयन् जनकं मुदा॥ पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ॥७॥ मख

११

संरक्षणार्थाय मया नीतो पितुः पुरात्। आगच्छन् राघवो मार्गे ताडकां विघ्नघातिनीं॥ व
शरेणैकेन हतवान्नोदितोसौ निविक्रमः। ततो मम आश्रमं गत्वा मम यज्ञविहिंसकान् ॥ ९ ॥
सुवाहुप्रमुखान्हत्वा मारीचं सागरे क्षिपत्॥ ततो गंगातटे रम्ये गौतमस्याश्रमे शुभे ॥ १० ॥
दृष्ट्वाहिल्यां नमस्कृत्य तया सम्यक् प्रपूजितः॥ पादाब्जरजःस्पर्शात्सा विशापाद्विमोचि
ता ॥ ११ ॥ इदानीं द्रष्टुकामस्ते गृहे माहेश्वरं धनुः॥ पूजितं राजभिः सर्वैर्दृष्टमित्यनुशुश्रुवे
अतो दर्शय राजेंद्र शोचं चापि मनुत्तमं॥ दृष्ट्वायोध्यां जिगमिषुः पितरं द्रष्टुमिच्छति ॥ १३ ॥ इ
त्युक्तो मुनिना राजा पूजार्हो वेति पूजया॥ पूजयामास धर्मज्ञो विधिदृष्टेन कर्मणा ॥ १४ ॥ ततः
संप्रेषयामास मंत्रिणं बुद्धिमत्तरं॥ जनक उवाच॥ शीघ्रमानीय विश्वेशचापं रामाय दर्श
य ॥ १५ ॥ ततो गते मंत्रिवरे राजा कौशिकमब्रवीत्॥ यदि रामो धनुर्दत्त्वा कोटावारोपये
द्गुणं ॥ १६ ॥ तदा मया सजा सीता दीयते राघवाय हि॥ तथेति कौशिको प्याह रामं संवीक्ष्य वि
स्मितः ॥ १७ ॥ शीघ्रं दर्शय चापाग्र्यं रामायामिततेजसे॥ एवं ब्रुवति मौनीशे आगताश्चा

33

पवाहकाः १८ चापं गृहीत्वा बलिनः पंचसाहस्रसंख्यकाः घंटाशतसमायुक्तं मणिव
ज्रविभूषितं १९ दर्शयामास रामाय मंत्री मे चेवतां वरः दृष्ट्वा रामः प्रहृष्टात्मा वध्वाप
रिकरं दृढं २० गृहीत्वा वामहस्तेन लीलया तोलयं द्धनुः आरोपयामास गुणं पश्यत्स्व स
खिलराजसु २१ ईषदाकर्षयामास पाणिना दक्षिणेन सः बभंजाखिलहृत्सारो दिशः
शब्देन पूरयन् २२ दिशश्च विदिशश्चैव स्वर्गमर्त्यरसातलं तदद्भुतमभूत्तत्र देवानां
दिवि पश्यतां २३ आच्छादयंतः कुसुमैर्देवास्तुतिभिरीडिरे दिवि दुंदुभयो नेदुर्ननृतु
श्चाप्सरोगणाः २४ द्विधाभग्नं धनुर्दृष्ट्वा राजालिंग्य रघूद्वहं विस्मयं लेभिरे सीतामात
रोंतःपुराजिरे २५ सीता स्वर्णमयीं मालां गृहीत्वा दक्षिणे करे स्मितवक्त्रा स्वर्णवर्णा सर्वा
भरणभूषिता मुक्ताहारैः कर्णपात्रैः क्वणच्चरणनूपुरा दुकूलपरिसंवीता वस्त्रांतर्व्यं
जितस्तनी २६ रामस्योपरि निक्षिप्य स्मयमाना मुदं ययौ ततो मुमुदिरे सर्वे राजदा
राः स्वलंकृताः २७ गवाक्षजालरंध्रेभ्यो दृष्ट्वा लोकविमोहनं ततोऽब्रवीन्मुनी राजा पत्रं

२६

प्रेषयस्व त्वरं राजा दशरथः शीघ्रमागच्छतु सपुत्रकः विवाहार्थं कुमाराणां सदारः स
हपुत्रकः ३० तथेति प्रेषयामास दूतांस्त्वरितविक्रमान् तेगत्वा राजशार्दूलं रामस्यैवा
न्यवेदयन् ३१ श्रुत्वा राम महोत्तं राजा हर्षेण महता वृतः मिथिलागमनार्थाय त्वरयामा
स मंत्रिणः ३२ गच्छंतु मिथिलां सर्वे गजाश्वरथपत्तयः रथमानय मे शीघ्रं गच्छाम्यद्य चे
व माचिरं ३३ वशिष्ठः स्पर्हितो यातु सदारः सहितोग्निभिः राममातरमादाय मुनिर्मे
भगवान् गुरुः ३४ एवं प्रस्थाप्य सकलं राजर्षिर्विपुलं रथं महत्या सेनया सार्द्धमारुह्य
त्वरितो ययौ ३५ आगतं राघवं श्रुत्वा राजा हर्षसमाकुलः प्रत्युज्जगाम जनकः शतानं
दपुरोधसा ३६ यथोक्तपूजया पूज्यं पूजयामास सत्कृतं रामस्तु लक्ष्मणेनाशु ववंदे चरणौ
पितुः ३७ ततो हृष्टो दशरथो राममेवचनमब्रवीत् दिष्ट्या पश्यामि ते राम मुखं फुल्लाम्बु
जेक्षणं ३८ मुनेरनुग्रहात्सर्वं संपन्नं मम शोभनं इत्युक्त्वालिंग्य मूर्द्धनि माघ्राय च पुनः
पुनः ३९ हर्षेण महताविष्टो ब्रह्मानंदं गतो यथा ततो जनकराजेन मंदिरं संप्रवेशितः ४०

ग

35

१८ शोभने सर्वभोगाढ्ये सदारः संस्थितः सुखी ततः शुभे दिने लग्ने सुमुहूर्ते रघूत्तमं आ
नाय्य स तु धर्मज्ञः सभ्रातृपितृकं तदा रत्नस्तंभसुविस्तारे सुवितानसुतोरणे ४३
मंडपे सर्वशोभाढ्ये मुक्तापुष्पफलान्विते वेदविद्भिः सुसंवासब्राह्मणैः स्वर्णभूषितैः
सुवासिनीभिः परितो निष्ककंठीभिरावृते भेरीदुंदुभिनिर्घोषगीतनृत्यसमाकुले
४४ दिव्यरत्नान्विते स्वर्णपीठे राममुपावेशयत् वसिष्ठं कौशिकं चैव शतानंदं पुरो
हितं ४५ यथाक्रमं पूजयित्वा रामस्योभयपार्श्वयोः स्थापयित्वासने चाग्निं ज्वाले
यित्वा यथाविधि ४६ सीतामानीय शोभाढ्यां नानारत्नविभूषितां सभार्यो जनकः
प्रादात् रामं राजीवलोचनं ४७ पादौ प्रक्षाल्य विधिवत् तदपो मूर्ध्न्यधारयत् या धृता मू
र्ध्नि शर्वेण ब्रह्मणा मुनिभिः सदा ४८ ततः सीतां करे धृत्वा साक्षतोदकपूर्वकं रामा
य प्रददौ प्रीत्या पाणिग्रहविधानतः ४९ सीता कमलपत्राक्षी स्वर्णमुक्तादिभूषिता १८
दीयते मे सुता तुभ्यं प्रीतो भव रघूत्तम ५० इति प्रीतेन मनसा सीतां रामकरेऽर्पयत्

तामद्राक्ष्महे प्रीत्या पुत्रिकाभावभाविकां ५

मुमोद जनको लक्ष्मीं क्षीराब्धिरिव विष्णवे उर्मिलाख्यां औरसीं कन्यां लक्ष्मणाय ददौ तदा
तेयेव श्रुतिकीर्तिं च मांडवीं भ्रातृकन्यके भरथाय ददौ वेक्लो शत्रुघ्नायापरां ददौ चत्वारो
दारसंपन्ना भ्रातरः शुभलक्षणाः ५३ विरेजुः प्रभया सर्वे लोकपालाइवापराः ततोब्रवीद्
शिष्टाय विश्वामित्राय मैथिलः ५४ जनकस्य सुता दत्ते नारदेनाभिभाषितं यज्ञभूमि
विशुद्ध्यर्थं कषता लांगलेन मे ५५ सीतामुखात्समुत्पन्ना कन्यका शुभलक्षणा अर्पि
ता प्रियभार्यायै शरच्चंद्रशुभानना ५६ एकदा नारदोभ्यागात् विविक्ते मयि संस्थिते ५७ रट
यन्महतीं वीणां मायन्नारायणं विभुं पूजितः सुखमासीनो मामुवाच मुदान्वितः ५८ शृ
णुष्व वचनं गुह्यं तवाभ्युदयकारणं परमात्मा हृषीकेशो भक्तानुग्रहकाम्यया ५९ देवका
र्यार्थसिद्ध्यर्थं रावणस्य वधाय वै जातो राम इति ख्यातो मायामानुषरूपधृक् ६० आ
स्ते दाशरथिर्भूत्वा चतुर्द्धा परमेश्वरः योगमायापि सीतेति जाता वै तव वेश्मनि ६१ अ
तस्त्वं राघवायैव देहि सीतां प्रयत्नतः नान्येभ्यः पूर्वभार्यैषा रामस्य परमात्मनः ६२ इत्यु

स्वाप्रयो दैवगतिर्देवं मुनिस्तदा तदारभ्य मया सीता विश्वमोर्हेर्भाव्यते ६३ क
थं मया राघवाय दीयते जानकी शुभा इति चिंतां समाविष्टः कार्यमेवमचिंतयं ६४ मति
नाम महद्गेहे पुन्यासमन्तेभिदं धनुः ईश्वरेण पुरा क्षिप्तं पुरदाहादनंतरं ६५ धनुरेतत्पणं
कार्यमिति चिंत्य कृतं तथा सीतापाणिग्रहार्थाय सर्वेषां मानना शनं ६६ त्वत्प्रसादान्मु
निश्रेष्ठ रामो राजीवलोचनः आनीतोत्र धनुर्द्रष्टुं फलितो मे मनोरथः ६७ अद्य मे सफ
लं जन्म राम त्वां सहसीतया एकासनस्थं पश्यामि भ्राजमानं रविं यथा ६८ त्वत्पदाब्जध
रो ब्रह्मा सृष्टिचक्रप्रवर्तकः बलिस्त्वत्पादसलिलं धृत्वाभूद्दिविजाधिपः ६९ त्वत्पादपां
सुसंस्पर्शादहल्या भर्तृशापतः सद्यस्त्वविनिर्मुक्ता को न्वस्त्वदधि रक्षिता ७० यत्पादपं
कजपरागसुरागयोगिवद्वर्जितं भवभयं जितकालचक्रैः यन्नामकीर्तनपरा जि
तदुःखशोका देवास्तमेव शरणं सततं प्रपद्ये ७१ इति स्तुत्वा निमिः प्रादादुद्वाहवायमहा
त्मने सुवर्णानां कोटिशतं रथानामयुतं तथा ७२ अश्वानां नियुतं प्रादाद्गजानामयुतं

तथा पदातीनां लक्षमेकं दासीनां त्रिशतं ददौ ७३ दिव्यांबराणि हारांश्च मुक्तारत्नम
योज्वलान् सीतायै जनकः प्रादात् प्रीत्या दुहितृवत्सलः ७४ वशिष्ठादीन्सुसंपूज्य भरतं
लक्ष्मणं तथा पूजयित्वा यथान्यायं तथा दशरथं नृपं ७५ प्रस्थापयामास नृपो राजा
नं रघुसत्तमं सीतामालिंग्य रुदतीं मातरः साश्रुलोचनाः ७६ श्वश्रुसुश्रूषणपरा नित्यं
राममनुव्रता पातिव्रत्यं समुपालंब्य तिष्ठ वत्से यथासुखं ७७ प्रयाणकाले रघुनंदनस्य
भेरीमृदंगानकतूर्यघोषाः स्वर्गे मृदंगानकतूर्यशब्दसंमूर्छितो भून्नभयंकरो भूत्
७८ इति श्रीमदध्यात्मरामायणे बालकांडे षष्ठः सर्गः समाप्तः ६ सूत उवाच अथ गच्छ
ति श्रीरामे मिथिलां योजनत्रयं निमित्तान्यतिघोराणि ददर्श नृपसत्तमः १ नत्वा वशि
ष्ठं पप्रच्छ किमिदं मुनिपुंगव निमित्तानीह दृश्यंते विषमाणि समंततः २ वशिष्ठस्त
ते मथोवाच भयमागामि सूच्यते पुनरप्यभयं तेद्य शीघ्रमेव भविष्यति ३ मृगाः प्रदक्षिणं
यांति त्वां पश्य शुभसूचकाः इत्येवं वदतस्तस्य ववौ घोरतमोऽनिलः मुष्णंश्चक्षूंषि सर्वे

ततोऽब्रजन्ददर्शाग्रे तेजोराशिमुपस्थितं कोटिसूर्यप्रतीकाशं विद्युत्पुंजसमप्रभं ९

षां पांसुवृष्टिभिरर्दयन् ४ ततो ददर्श भगवान्जामदग्निंप्रतापवान् ५ नीलमेघनिभः
प्रांशुर्जटामंडलमंडितः धनुःपरशुपाणिश्च साक्षात्कालइवांतकः ६ कार्तवीर्यांतको राम
दृप्तक्षत्रियमर्दनः प्राप्तो दशरथस्याग्रे कालमृत्युरिवापरः ७ तं दृष्ट्वा भयसंत्रस्तो राजा द
म.५ शरथस्तदा अर्घ्यादिपूजां विस्मृत्य त्राहि त्राहीति चाब्रवीत् ८ दंडवत्प्रणिपत्याह पुत्रप्राणा
न्प्रयच्छ मे इति ब्रुवंतं राजानमनादृत्य रघूत्तमं उवाच निष्ठुरं वाक्यं क्रोधात्प्रचलितेंद्रि
यः त्वं राम इति नाम्ना मे चरसि क्षत्रियाधम ९ द्वंद्वयुद्धं प्रयच्छाशु यदि त्वं क्षत्रियोऽसि मे
पुराणं जर्जरं चापं भंक्त्वा त्वं कत्थसे मुदा ११ इदं तु वैष्णवं चापमारोपयसि चेद्गुणं तदा यु
द्धं त्वया सार्द्धं करोमि रघुवंशज नो चेत्सर्वान्हनिष्यामि क्षत्रियांतकरो ह्यहं इति ब्रुवति वै
तस्मिंश्च चालवसुधा भृशं अंधकारो बभूवाथ सर्वेषामपि चक्षुषां रामो दाशरथिर्वी
रो वीक्ष्य तं भार्गवं रुषा धनुराच्छिद्य तद्धस्तादारोप्य गुणमंजसा तूणीराद्बाणमादाय सं
धाय कृष्य वीर्यवान् उवाच भार्गवं रामो शृणु ब्रह्मन्वचो मम लक्ष्यं दर्शय बाणस्य त्व

मोघो राम स सायकः लोकान्वा द्युगं वापि वद शीघ्रं मम आशयो एवं वदति श्री रामे भार्गवो
विह्वलाननः १७ संस्मरन्पूर्ववृत्तांतमिदं वचनमब्रवीत् राम राम महाबाहो जाने त्वां पर
मेश्वरं १८ पुराणपुरुषं विष्णुं जगत्सर्गलयोद्भवं बाल्येहं तपसा विष्णुमाराधयितुमंजसा
चक्रतीर्थं महं गत्वा तपसा विष्णुमन्वहं अतोषयं महात्मानं नारायणमनन्यधीः २० त
तः प्रसन्नो देवेशः शंखचक्रगदाधरः उवाच मां रघुश्रेष्ठ प्रसन्नमुखपंकजः २१ श्रीभग
वानुवाच उत्तिष्ठ तपसो ब्रह्मन्फलितं ते तपो महत् मच्चिदंशेन संयुक्तो जहि हैहयपुंगवं २२
कार्तवीर्यं पितृहणं यदर्थं तपसः श्रमः ततस्त्रिःसप्तकृत्वोहं हत्वा क्षत्रियमंडलं २३ कृत्स्नां
भूमिं कश्यपाय दत्वा शांतिमुपावह त्रेतायुगे दाशरथिर्भूत्वा रामोहमव्ययः २४ उत्पत्स्ये
परया भक्त्या तदा द्रक्ष्यसि मां पुनः तत्तेजः पुनरादास्ये त्वयि दत्तं मया पुरा २५ तदा तपश्च
रल्लोके तिष्ठ त्वं ब्रह्मणो दिनं इत्युक्त्वांतर्दधे देवस्तथा सर्वं कृतं मया २६ स एव विष्णुस्त्वं राम
जातोसि ब्रह्मणार्थितः मय्यवस्थितं तत्तेजस्त्वयैव पुनराहृतं २७ अद्य मे सफलं जन्म प्रती

२१

तोसि मम प्रभो ब्रह्मादिभिरलभ्यस्त्वं प्रकृतेः परमो यतः २८ त्वय्यजन्मादिषड्भावा न सन्त्य
ज्ञानसंभवाः निर्विकारोसि पूर्णस्त्वं गमनादिविवर्जितः २९ यथा जले फेनजालं धूमो
वन्हौ तथा त्वयि त्वदाधारा त्वद्विषया माया कार्य्यं सृजत्यहो ३० यावन्मायावृता लोकास्ता
वत्त्वां न विजानते अविचारितसिद्धेषाविद्या विद्याविरोधिनी ३१ अविद्याकृतदेहादि
संघाते प्रतिबिंबिता चिच्छक्तिर्जीवलोकेस्मिन् जीव इत्यभिधीयते ३२ यावद्देहमनःप्रा
णबुध्यादिष्वभिमानवान् तावत्कर्तृत्वभोक्तृत्वसुखदुःखादिभा वेत् ३३ आत्मनः सं ग्भ ३
सृतिर्नास्ति बुध्याज्ञानघने त्वयि अविवेकाद्ध्रुवं भुंक्ते संसारीति प्रवर्तते ३४ जडस्य चित्स
मायोगाच्चित्त्वं भूयाच्चितेस्तथा जडसंगाज्जडत्वं हि जलाग्न्योर्मेलनं यथा ३५ यावत्त्वत्पाद
भक्तानां संगसौख्यं न विंदति तावत्संसारदुःखौघान्न निवर्तेन्नरः सदा ३६ सत्संगलब्धया
भक्त्या यदा त्वां समुपासते तदा माया शनैर्याति तानवत्वं प्रतिपद्यते ३७ ततस्तु ज्ञानसंपन्नः
सद्गुरुस्तस्य लभ्यते वाक्यज्ञानं गुरोर्लब्ध्वा त्वत्प्रसादाद्विमुच्यते ३८ तस्मात्त्वद्भक्तिहीनानां २१

तत्सर्वंतववाणायभूयाद्रामनमोस्तुते ४

देवयद्यत्कृतंपुण्यंमयालोकजिगीषया

कल्पकोटिशतेरपि नमुक्तिशंकाविज्ञानशंकानेवसुखंतथा ३९ अतस्त्वत्पादयु

गलेभक्तिर्जन्मजन्मनि स्यात्त्वद्भक्तिमतांसंगोऽविद्यायोभ्यौ विनश्यति ४० लोके

त्वद्भक्तिनिरताः सुधर्मामृतवर्षिणः पुनंतिलोकमखिलंकिंपुनस्त्वत्कुलोद्भवान् भ

नमोस्तुजगतांनाथनमस्तेविश्वभावन नमःकारुणिकानंतरामचंद्रनमोस्तुते ४१

ततःप्रसन्नोभगवान्श्रीरामःकरुणामयः प्रसन्नोऽस्मितवब्रह्मन्यत्तेमनसिवर्त्तते

४२ दास्येतदखिलंकामंमाकुरुष्वात्रसंशयं ततःप्रीतेनमनसाभार्गवोराममब्रवी

तू ४४ यदिमेनुग्रहोरामतवास्तिमधुसूदन त्वद्भक्तसंगस्त्वत्पादेममभक्तिःसदास्तु

मे ४५ स्तोत्रमेतत्पठेद्यस्तुभक्तिहीनोपिसर्वदा त्वद्भक्तिस्तस्यविज्ञानंभूयादंतेस्मृति

स्तवे ४६ तथेतिराघवेणोक्तःपरिक्रम्यप्रणम्यतं पूजितस्तदनुज्ञातोमहेंद्राचलमभ्य

गान् ४७ राजादशरथोहृष्टोरामंमृतमिवागतं आलिंग्यालिंग्यहर्षेणनेत्राभ्यांजलं

मृत्स्रजन् ४८ ततःप्रीतेनमनसास्वस्थचित्तःपुरंययौ रामलक्ष्मणशत्रुघ्नभरतादेव

२२ संमिताः ४९ स्वां स्वां भार्य्यामुपादाय रेमिरे स्वस्वमंदिरे मातापितृभ्यां संहृष्टो रामः सी
तासमन्वितः ५० रेमे वैकुंठभवने श्रिया सह यथा हरिः युधाजिन्नाम कैकेय्या भ्राता
भरतमातुलः ५१ भरतं नेतुमागच्छत् स्वराज्यं प्रीतिसंयुतः प्रेषयामास भरतं राजा
स्नेहसमन्वितः ५२ शत्रुघ्नं चापि संपूज्य युधाजितमरिंदमः कौशल्या शुशुभे देवी
रामेण सह सीतया ५३ देवमातेव पौलोम्या शच्या शक्रेण शोभने ५३ साकेते लो
कनाथप्रथितगुणगणो लोकसंगीतकीर्ति श्रीरामे श्रीतयास्ते खिलगुरुनिकेरा जनानंद
नंदसंदोहमूर्तिः नित्यश्रीर्निर्विकारो निरवधिविभवो नित्यमायानुकारी मायाका
र्यानुसारी मनुजइव सदा भाति देवोऽखिलेशः ५४ इतिश्रीमदध्यात्मरामायणे उ
मामहेश्वरसंवादे बालकांडे सप्तमः सर्गः ७ छ छ छ छ छ छ छ छ छ छ
समाप्तायं बालकांडः अध्यात्मबालकांडे सर्गाः सप्त वै शंभुना दिष्टाः पंचाशन्नरेशते त्रि
श्लोकाः पुण्या मोक्षप्रदा नृणां अस्मिन्बालकांडश्लोकसंख्या ३६० श्रीरामायनमः २२

श्रीगणेशाय नमः महादेव उवाच एकदा सुखमासीनो रामः स्वांतःपुराजिरे सर्वाभ
रणसंपन्नं रत्नसिंहासने स्थितं १ नीलोत्पलदलस्यामं कौस्तुभामुक्तकंधरं सीतया
रत्नदंडेन चामरेण विराजितं २ विनोदयंतं तांबूलचर्वणादिभिरादरात् नारदोवतर
द्द्रष्टुमंबराद्यत्र राघवः ३ शुद्धस्फटिकसंकाशः शरच्चंद्र इवामलः अतर्कितउपा
यातो नारदो दिव्यदर्शनः ४ तं दृष्ट्वा सहसोत्थाय रामः प्रीत्या कृतांजलिः ननाम शिर
सा भूमौ सीतया सह भक्तिमान् ५ उवाच नारदं रामः प्रीत्या परमया युतः संसारिणां
मुनिश्रेष्ठ दुर्लभं तव दर्शनं ६ अस्माकं विषयासक्तचेतसां नितरां मुने अवाप्तं मे
पूर्वजन्मकृतपुण्यफलोदयात् ७ संसारिणोपि हि मुने लभ्यते सत्समागमः अतस्तव
दर्शनादेव कृतार्थोस्मि मुनीश्वर ८ किं कार्य्यं ते मया कार्य्यं ब्रूहि तत्करवाणि भो अथ
तं नारदोप्याह राघवं भक्तवत्सलं ९ किं मोहयसि मां राम वाक्यैर्लोकानुसारिभिः संसा
र्यहमिति प्रोक्तं सत्यमेव त्वयोदितं १० जगतामादिभूता या सा माया गृहिणी तव त्वत्सं

२३

त्रिवर्णाजायंतेतस्यांब्रह्मादयःप्रजाः ११ त्वत्सान्निध्यात्सदाभातिमायेयंत्रिगुणात्मि
कासितासिताश्चरक्ताश्चशुक्लकृष्णलोहितासर्वदाप्रजाः १२ लोकत्रयमहागेहेगृहस्थस्त्वमुदा
हृते त्वंविष्णुर्जानकीलक्ष्मीःशिवस्त्वंजानकीशिवा १३ ब्रह्मात्वंजानकीवाणीसूर्यस्त्वं
जानकीप्रभा भवान्शशांकःसीतातुरोहिणीशुभलक्षणा १४ शक्रस्त्वमेवपौलोमीसी
तास्वाहानलोभवान् यमस्त्वंकालरूपश्चसीतासंयमनीप्रभो १५ निरृतिस्त्वंजगन्ना
थतामसीजानकीतथा रामस्त्वमेववरुणोभार्गवीजानकीशुभा १६ वायुस्त्वंरामसी
तातुसदागतिरितीरिता कुबेरस्त्वंरामसीतासर्वसंपत्प्रकीर्तिता १७ रुद्राणीजान
कीप्रोक्तारुद्रस्त्वंलोकनाशकृत् लोकेस्त्रीवाचकंयावत्तत्सर्वंजानकीशुभा १८ पुन्ना
मवाचकंयावत्तत्सर्वंत्वंहिराघव तस्माल्लोकत्रयेदेवयुवाभ्यांनास्तिकिंचन १९ त्वदाभा
सोदिताज्ञानमव्याकृतमितीर्यते तस्मान्महांस्ततःसूत्रंलिंगंसर्वात्मकंततः २० अहंका
रश्चबुद्धिश्चपंचप्राणेंद्रियाणिच लिंगमित्युच्यतेप्राज्ञैर्जन्ममृत्युसुखादिमत् २१ सए

२३

56

वजीवसंज्ञश्च लोके भाति जगन्मयः अनाद्यविद्यानस्येव कारणोपाधिरुच्यते २२ स्थूलं
सूक्ष्मं कारणाख्यमुपाधित्रितयं चितेः एतैर्विशिष्टो जीवः स्याद्वियुक्तः परमेश्वरः २३ जाग्र
त्स्वप्नसुषुप्त्याख्या संसृतिर्या प्रवर्तते तस्या विलक्षणः साक्षी चिन्मात्रस्त्वं रघूत्तम २४ त्व
त्त एव जगज्जातं त्वयि सर्वं प्रतिष्ठितं त्वय्येव लीयते कृत्स्नं तस्मात्त्वं सर्वकारणं २५ रज्जा
वहिमिवात्मानं जीवो ज्ञात्वा भयं व्रजेत् परमात्माहमिति ज्ञात्वा भयदुःखैर्विमुच्यते २६ चि
न्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः त्वया यस्मात्प्रकाश्यंते सर्वस्यात्मा ततो भवान्
२७ अज्ञानादृश्यते सर्वं त्वयि रज्जौ भुजंगवत् त्वज्ज्ञानाल्लीयते सर्वं तस्माज्ज्ञानं सदाभ्यसे
त् २८ त्वत्पादभक्तियुक्तानां विज्ञानं भवति क्रमात् तस्मात्त्वद्भक्तियुक्ता ये मुक्तिभाजस्त एव
हि २९ अहं त्वद्भक्तभक्तानां तद्भक्तानां च किंकरः अतो मामनुगृह्णीष्व मोहयस्व न मे विभो ३०
त्वन्नाभिकमलोत्पन्नो ब्रह्मा मे जनकः प्रभो अतस्तवाहं पौत्रोऽस्मि भक्तं मां पाहि राघव ३१
इत्युक्त्वा बहुशो नत्वा स्वात्मानंदाश्रुपरिप्लुतः उवाच वचनं रामं ब्रह्मणा नोदितोऽस्म्यहं ३२ रा

२४

वणस्य वधार्थाय जातोसि रघुसत्तम इदानीं राज्यशिक्षार्थं पिता त्वामभिषेक्ष्यति ३३
यदि राज्याभिसंक्तो रावणं न हनिष्यसि प्रतिज्ञा तेकृता राम भूभारहरणाय वै तत्सत्यं
कुरु राजेंद्र सत्यसंधस्त्वमेव हि श्रुत्वैतद्गदितं रामो मुनिनाप्राह सस्मितं ३५ शृणु नो
रदमे किंचिद्गुप्तं विदितं कचित् प्रतिज्ञातं च यत्पूर्वं करिष्ये तन्न संशयः ३६ किंतु का
लानुरोधेन तत्तत्प्रारब्धसंक्षयात् हरिष्ये सर्वभूभारं क्रमेणासुरमंडलं ३७ रावणस्य
विनाशार्थं श्वो गंता दंडकाननं चतुर्दश समास्तत्र ह्युषित्वा मुनिवेषधृक् ३८ सीतामि
षेण तं दुष्टं सकुलं नाशयाम्यहं एवं रामे प्रतिज्ञाते नारदः प्रमुमोद ह ३९ प्रदक्षिणात्र
यं कृत्वा दंडवत्प्रणिपत्य तं अनुज्ञातश्च रामेण ययौ देवगतिं मुनिः ४० संवादं पठति
शृणोति संस्मरेद्वा यो नित्यं मुनिनारदयोः समं त्या संप्राप्नोत्यमरसुदुर्लभं विमोक्षं कै
वल्यं विरचितपुरःसरं क्रमेण ४१ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अयो
ध्याकांडे प्रथमः सर्गः १ सूत उवाच अथ राजा दशरथः कदाचिद्रहसि स्थितः वशिष्ठं

२४

स्वकुलाचार्य्यमाहूयेदमभाषत १ राजोवाच भगवन्राममखिलाः प्रशंसंति मुहुर्मुहुः
पौराश्च नैगमा वृद्धा मंत्रिणश्च विशेषतः २ ततः सर्वगुणोपेतं रामं राजीवलोचनं ज्ये
ष्ठं राज्येभिषेक्ष्यामि वृद्धोहं मुनिपुंगव ३ भरतो मातुले देशे गतः शत्रुघ्न संयुतः अ
भिषेक्ष्येश्वरो वाशु भवांस्तत्रानुमोदतां ४ संभाराः संभ्रियंतां सर्वे गच्छ मंत्रय राघवं
उच्छ्रीयंतां पताकाश्च नानावर्णाः समंततः ५ तोरणानि विचित्राणि स्वर्णमुक्तामयानि
च आहूय मंत्रिणं राजा सुमंत्रं मंत्रिसत्तमं ६ आज्ञापयति यद्यत्वां मुनिस्तत्तत्समानय
यौवराज्येभिषेक्ष्यामि श्वोभूते रघुनंदनं ७ तथेति हर्षात्स मुनिं किं करोमीत्यभाषत त
मुवाच महातेजा वशिष्ठो ज्ञानिनां वरः ८ श्वः प्रभाते मध्यकक्षे कन्यकाः स्वर्णभूषिताः
तिष्ठंतु षोडश गजाः स्वर्णरत्नादिभूषिताः ९ चतुर्दंताः समायांतु ऐरावतकुलोद्भवाः
नानातीर्थोदकैः पूर्णाः स्वर्णकुंभाः सहस्रशः १० स्थाप्यंतां नव वैयाघ्रचर्माणि त्रीणि चा
नय श्वेतच्छत्रं रत्नदंडं मुक्तामणिविराजितं ११ दिव्यमालानि वस्त्राणि दिव्यान्याभरणा

२५ निच मुनयः सत्कृतास्तत्र तिष्ठंतु कुशपाणयः १२ हस्त्यश्वरथपादाता बहिस्तिष्ठंतु सायु
धाः नगरस्थानि तिष्ठंतु देवतायतनानि च १३ तेषां प्रवर्ततां पूजा नानाबलिभिरा व
ताः राजानः श्रीप्रमायांतु नानोपायनपाणयः १४ नर्तक्यो वारमुख्याश्च गायकाश्च वैण
कास्तथा नानावादित्रकुशलास्ते भवंतु नपांगणे १५ इत्यादिश्य मुनिः श्रीमान्सुमंत्रेण
च संमंत्रिणं स्वयं जगाम भवनं राघवस्यातिभास्वरं १६ रथमारुह्य भगवान्वशिष्ठो मु
निसत्तमः त्रीणि कक्षाण्यतिक्रम्य रथात्क्षितिमवातरत् १७ अंतः प्रविश्य भगवान्नो चा
र्यस्त्वादवारितः गुरुमागतमाज्ञाय रामस्तूर्णं कृतांजलिः १८ प्रत्युद्गम्य नमस्कृत्य दंडव
द्भक्तिसंयुतः स्वर्णपात्रेण पानीयमानिया माशु जानकी १९ रत्नासने समावेश्य पादौ प्र
क्षाल्य भक्तितः तदापः शिरसा धृत्वा सीतया सह राघवः २० धन्योस्मीत्यब्रवीद्रामस्तव
पादांबुधारणात् श्रीरामेणैवमुक्तस्तु प्रहसन्मुनिरब्रवीत् २१ त्वत्पादसलिलं धृत्वा धन्यो
भूद्गिरिजापतिः ब्रह्मापि मत्पिता तेहि पादतीर्थहताशुभः २२ इदानीं भाषसे महं लोकानां २५

जानामि त्वां परात्मानं लक्ष्म्या संजातमीश्वरं २३ देवकार्यार्थसिद्ध्यर्थं भक्तानां भक्तिसि
द्धये रावणस्य वधार्थाय जातं जानामि राघवं २४ तथापि देवकार्यार्थं गुह्यं नोद्घाटयाम्य
हं यथा त्वं मायया सर्वं करोषि रघुनंदन २५ तथैवानुविधास्येहं शिष्यस्त्वं गुरुरित्यहं
गुरुर्गुरूणां त्वं देवपितृणां त्वं पितामहः २६ अंतर्यामी जगद्यात्रावाहकस्त्वमगोचरः
शुद्धसत्त्वमयं देहं धृत्वा स्वाधीनसंभवं २७ मनुष्य इव लोकेस्मिन्भासि त्वं योगमायया
पौरोहित्यमहं जाने विगर्ह्यं दुःखजीवनं २८ इक्ष्वाकूणां कुले रामः परमात्मा जनिष्य
ते इति ज्ञातं मया पूर्वं ब्रह्मणा कथितं पुरा २९ ततोहमाशया राम तव संबंधकांक्षया अ
कार्षं गर्हितमपि त्वदाचार्यत्वसिद्धये ३० ततो मनोरथो मेद्य फलितो रघुनंदन त्वदधीना
महामाया सर्वलोकविमोहिनी ३१ मां यथा मोहयेन्नैव तथा कुरु रघूद्वह गुरुनिष्कृतिका
मस्त्वं यदि देह्येतदेव मे ३२ प्रसंगात्सर्वमप्युक्तं न वाच्यं कस्यचिन्मया राज्ञा दशरथेना
हं प्रेषितोस्मि रघूद्वह त्वामामंत्रयितुं राज्ये श्वोभिषेक्ष्यति राघव अद्य त्वं सीतया सार्द्धं

मुपवासं यथाविधि ३४ कृत्वा शुचिर्भूमिशायी भव राम जितेंद्रियः गच्छामि राजसांनिध्यं त्वं तु प्रातर्गमिष्यसि ३५ इत्युक्त्वा रथमारुह्य ययौ राजगुरुर्द्रुतं रामोऽपि लक्ष्मणं स्पृष्ट्वा प्रहसन्निदमब्रवीत् ३६ सौमित्रे यौवराज्येऽभिषेको भविष्यति निमित्तमात्रमेवाहं कर्त्ता भोक्ता त्वमेव हि ३७ मम त्वं हि बहिः प्राणो नात्र कार्या विचारणा ततो वशिष्ठेन यथा भाषितं तत्तथाऽकरोत् ३८ वशिष्ठोऽपि नृपं गत्वा कृतं सर्वं न्यवेदयत् वशिष्ठस्य गुरो राज्ञा हुत्वे रामाभिषेचनं ३९ यदा तदैव नगरे श्रुत्वा कश्चित्सुमानुजेगो कौशल्यायै रामार्थे सुमित्रायै तथैव च ४० श्रुत्वा तं हर्षसंपूर्णे ददतुर्हेममुत्तमं तस्मै ततः प्रीतमना कौशल्या पुत्रवत्सला ४१ लक्ष्मीं पर्य्यचरद्देवीं रामस्यार्थप्रसिद्धये सत्यवादी दशरथः करोत्येव प्रतिश्रुतं ४२ कैकेयी वशगः किंतु कामुकः किं करिष्यति इति व्याकुलचित्ता सा दुर्गां देवीमपूजयत् ४३ एतस्मिन्नंतरे देवा देवीं वाणीमचोदयन् गच्छ देवि भुवो लोके मयोध्यायां प्रयत्नतः ४४ रामाभिषेकविघ्नार्थं यतस्व ब्रह्मवाक्यतः मंथरां प्रविशस्वादौ कै

केयी च ततः परं ४५ ततो विप्रे समुत्पन्ने पुनरेहि दिवं शुभे तथोत्सुका तथा चैके प्रविवेश
च मंथरा ४६ सापि कुब्जा त्रिवक्रा तु मंदिरे तम मारुहत् नगरं परितो दृष्ट्वा सर्वतः समलं
कृतं ४७ नानातोरणसंबाधं पताकाभिरलंकृतं सर्वोत्सवसमायुक्तं विस्मिता पुर्नमागम
त् ४८ कौशल्यां चातिहर्षेण धात्री पप्रच्छ यानकी नानोत्सवसमायुक्ते नगरं समलंकृतं
४९ ददाति विप्रमुख्येभ्यो वस्त्राणि विविधानि च मंथरोवाच तामुवाच तदा धात्री राम
चंद्राभिषेचनं श्वो भविष्यति तेनायं सर्वतो लंकृतं पुरं तच्छ्रुत्वा त्वरिता गत्वा कैकेयीं वा
क्यमब्रवीत् पर्यंकस्थां विशालाक्षीमेकांते पर्यवस्थितां किं शेषे दुर्भगे मूढ महद्भय
मुपस्थितं न जानीषेति सौंदर्यमानिनी मत्तगामिनी रामस्य राज्ञो नुग्रहाच्छ्वोभिषे
कोभविष्यति ५२ तच्छ्रुत्वा सहसोत्थाय कैकेयी प्रियवादिनी तस्यै दिव्यं ददौ स्वर्णनूपुरं
रत्नभूषितं ५४ हर्षस्थाने किमिति मे कथ्यसे भयमागतं भरतादधिको रामः प्रियकृन्मे
प्रियंवदः ५५ कौशल्यां मां समं पश्यन् सदा शुश्रूषते हि मां रामाद्भयं किमापन्नं तव मूढे

२७ वदस्व मे तत्त्वतो नि प्रसादाथ कुब्जा कारणवैरिणी शृणु मद्वचनं देवी यथाजातं महद्भयं
५७ सौतो प्रपन्नसे दा राजा प्रियवाक्यानि भाषते कामुको नप्यवाक्षीच सौवाचापरितोषय
नू ५८ कार्य्यं करोति तस्या वै राममातुः सुपुष्कलं मनस्य तत्वि धाये वै प्रेषयामास ते सुतं
भरतं मातुलकुले त्वरयामास सानुजं सुभ आयां समीचीनं भविष्यति न संशयः लक्ष्मणो
राममन्वेति राज्यं सोनुभविष्यति भरतो राघवस्याग्रे किंकरो वा भविष्यति ६१ विवा
स्यते वा नगरात् प्राणैर्वा हाप्यते चिरात् त्वं तु दासीव कौशल्यां नित्यं परिचरिष्यसि ६२
ततोपि मरणं श्रेयो यत्सपत्न्याः पराभवात् अतः शीघ्रं यतः स्वाद्य भरतस्याभिषेचने
रामस्य वनवासार्थं नव वर्षाणि पंच च ततो रूढो भवेत्पुत्रस्तव राज्ञि भविष्यति उपायं
ते प्रवक्ष्यामि पूर्वमेव विनिश्चितं पुरा देवासुरे युद्धे राजा दशरथः स्वयं ६५ इंद्रेण याचि
तो धन्वी सहायार्थं महारथः जगाम सेनया सार्द्धं त्वया सह शुभानने ६६ युद्धं प्रकुर्वत
स्तस्य राक्षसी सह धन्विना तदाक्षकीलोन्यपतच्छिन्नस्तस्यन वेदसः ६७ त्वं तु हस्ते स २७

मावेश्य कीलरं श्रेति धैर्यतः स्थितवत्यसितापांगी पतिप्राणपरीक्षया ८ ततोहसोऽ
सुरान्सर्वान्ददर्श त्वामरिंदमः आश्चर्यपरमं लेभे त्वामालिंग्य मुदान्विता ६९ वरणीष्वय
न्मेमनसि वांछितं वरदोम्यहं वरद्वयं वरणीष्व त्वमेवं राज्ञि वदत्यपि ७० त्वयोक्तं वरदौ रा
जन्यदि दत्तं वरद्वयं तथेत्युक्त्वा ययौ राजा मंदिरे तव सुव्रते ७१ त्वत्तः श्रुतं वै मिदानी प्र
स्मृतिमागतं अतः शीघ्रं प्रविश्याथ क्रोधागारे रुषान्विता ७२ विमुच्य सर्वाभरणं स
र्वतो विनिकीर्य्य यत् भूमावेव शयानात्वं तूष्णीमातिष्ठ भामिनी ७३ यावत्त्वं प्रतिज्ञा
य राजाभीष्टं करोतु ते श्रुत्वा निवेकयोक्तं तत्तदा कैकेय्यनंदिनी ७४ तथ्यं मे वाखि
ता लं मेने दुःसंगाहितविघ्नं माहकैकेयी हृष्टा कुतस्ते बुद्धिरीदृशी ७५ एवं त्वां बुद्धिसंपन्नां
न जने वक्रसुंदरि भरतो यदि राजा मे भविष्यसुतः प्रियः ७७ ग्रामान्राष्ट्रं प्रदास्यामि
ममत्वं प्राणवल्लभा इत्युक्त्वा कोपभवनं प्रविश्य सहसा रुषा ७८ विमुच्य सर्वाभरणप
रिकीर्यसमंततः भूमौ शय्यानामलिनामलिनांवरधारिणी ७९ प्रोवाच शृणु मे कुब्जे
ता को

पावद्ग्रामेवनंव्रजेत् प्राणांस्त्यक्षेप्यथावक्केशपिष्येनांवदेवहि ८० निश्चयंकुरुकल्याणि
कंल्यानंतेभाविष्यति इत्युक्तामयपोकुआगहंसांतथाकरोत् ८१ धीरोसंतदयान्वितो
पिस्तगुणाचारान्वितोवार्यनीतिसोविप्रवादंदेशिकपरोविद्याविवेकोथवा दुष्टानाम
तिपायभावितधियासंगंसदावर्जयेत्तद्धृष्ट्यैपरिभावितोव्रजतितत्साम्यंक्रमेणस्फुटं ८२
ज्ञात्वसंगःपरित्यज्योदुष्टानांसदैवहि दुःसंगीच्यवतेस्वार्थाद्यथेयंराजकन्यका ८३ इतिश्री
मद्ध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेद्वितीयःसर्गः २ ततोराजादशर
थोरामाभ्युदयकारणात् आदिश्यमंत्रिप्रकृतीःसानंदोगृहमाविशत् १ तत्राऽदृष्ट्वा
प्रियांराजाकिमेतदितिविह्वलः यापुरामंदिरंतस्याःप्रविष्टेमयिशोभना हसंतीमामु
पायातिसाकिंनैवाद्यदृश्यते २ इत्यात्मन्येवसंचिन्त्यमनसातिविदूयता ३ पप्रच्छदासी
निकरंकुतोवःस्वामिनीशुभाः नोयातिमांयथापूर्वंमत्प्रियाप्रियदर्शना ४ ताऊचुः
धमगवनंप्रतिष्ठांनैवविग्रहे कारणंतन्नवेदेवत्वंगत्वांनिश्चेतुमर्हसि ५ इत्युक्तोभय

संत्रस्तो राजा तस्याः समीपगः उपविश्य शनैर्देहं स्पृशंश्च पाणिनाब्रवीत् ६ किं शेषे व
सुधापृष्ठे पर्यंकादीन्विहाय च मां त्वं खेदयसे भीरु यतो मां नाभिभाषसे ७ अलंकारं प
रित्यज्य भूमौ मलिनवाससा किमर्थं ब्रूहि सकलं विधास्ये तव वांछितं ८ को वा
पि॰ नवाहितं कर्त्ता नारी वा पुरुषो वा समे प्रियश्च वध्यश्च भविष्यति न संशयः ९ ब्रूहि दे
वि यथा प्रीतिस्तद्वं स्वयमनागतः तदिदानीं साधयिष्ये सुदुर्लभमपि क्षणात् १०
जानासि त्वं मनस्त्वां तं प्रियं मां त्वद्वशे स्थितं तथापि मां खेदयसे वृथा तव परिश्रमः ११
ब्रूहि कं धनिनं कुर्यां दरिद्रं नेप्रियं करं धनिनं क्षणमात्रेण निर्धनं च न वाहितं १२
ब्रूहि कं वा वधिष्यामि वध्यार्हो वा विमोक्षते किमत्र बहुनोक्तेन प्राणैर्दास्यामि ते प्रिये १३
मम प्राणा प्रियतरे रामो राजीवलोचनः तस्योपरि शपे ब्रूहि त्वद्धितं तत्करोम्यहं १४
शति ब्रुवाणं राजानं शपन्तं राघवोपरि शनैर्विमृज्य नेत्रे सा राजानं प्रत्यभाषत १५ य
दि सत्यप्रतिज्ञोऽसि शपथं कुरुषे यदि याच्यां मे सफलां कर्तुं शीघ्रमेव त्वमर्हसि १६

प्रवं दै(वा)सुरे युद्धे मया त्वं परिरक्षितः तदा वरद्वयं दत्तं त्वया मे तुष्टचेतसा १७ तद्द्वयं न्यास
भूतं मे स्थापितं त्वयि सुव्रत तत्रैकेन वरेणाशु भरतं मे प्रियं सुतं १८ एभिः संभृतसं
भारैर्यौवराज्येभिषेचय अपरेण वरेणाशु रामो गच्छतु दंडकान् १९ मुनिवेषधरः श्री
मान् जटावल्कलभूषणः चतुर्दश समास्तत्र कंदमूलफलाशनः २० पुनरायातु न
स्थाने वने वा तिष्ठतु स्वपं प्रभाते गच्छतु वनं रामो राजिवलोचनः २१ यदि किंचि
द्धितं वेत्सि प्राणास्त्यक्ष्ये तवाग्रतः भवत्स सप्रतिज्ञस्त्वं एतदेव मम प्रियं २२ श्रुत्वैतद्दारु
णं वाक्यं कैकेय्या रोमहर्षणं निपपात महीपालो वज्राहत इवाचलः २३ शनैरुन्मी
ल्य नयने विमन्युपरया गिरा दुःस्वप्नो वा मया दृष्टो ह्यथवा चित्तविभ्रमः २४ इत्या
लोक्य पुरः पत्नीं व्याघ्रीमिव पुरःस्थितां किं दं भाषसे भद्रे मम प्राणहरं वचः २५ रामः
कमपराध्यंते कृतवान् कमलेक्षणः ममाग्रे राघवगुणं वर्णयस्यनिशं शुभान् २६
कौशल्यां मां समं पश्यन् शुश्रूषां कुरुते सदा इति ब्रुवंती त्वं पूर्वं इदानीं भाषसेन्यथा २७ राजा

यं

गृहाण पुत्राय राज्यमभिषिंचतु मंदिरे अनुगच्छतु मां वा मे रामान्नास्ति भयं तव २८ इत्युक्ता श्व
पापीनाक्षी पादयोर्निपपात ह कैकेयि मत्सुवाचेदं सापि रक्तांतलोचना २९ राजेंद्र किं त्वं भ्रा
न्तोसि सत्यं त्वं द्राक्षसे यथा मिथ्या करोषि चेत्सत्यं भाषितं नरको भवेत् ३० वनं न गच्छेद्य
दि रामः दुःसभा न काले जिनचीरपुत्रकः उद्बंधनं वा विषभक्षणं वा कृत्वा मरिष्ये पुरतस्तवा
हं ३१ सत्यं प्रतिज्ञातो हि मतीह लोके विंडवसे सर्वसभां नरेषु रामोपरि त्वं शपथे च कृत्वा मिथ्या
भाविस्तो नरकं प्रयाहि ३२ इत्युक्तः प्रियया दीनो मग्नो दुःखार्णवे नृपः मूर्छितः पतितो भूमौ
विसंज्ञो मृतकोपमा ३३ एवं रात्रिर्गतानल्पदुःखोहं वत्सरोपमा अरुणोदयकाले तु व
दिनो गायका जगुः ३४ निवारयित्वा तान्सर्वान्कैकेयी रोषमास्थिता ततः सभासमये
मध्यकक्षामुपस्थिता ३५ ब्राह्मणाः क्षत्रिया वैश्या ऋषयः कन्यकास्तथा छत्रं च चामरं
दिव्यं गजो वाजिनथैव च ३६ अन्याश्च वारमुख्या या पौरजानपदास्तथा वसिष्ठेन यथार्ह
मेतत्सर्वं तत्र संस्थितं ३७ स्त्रियो बालाश्च वृद्धाश्च रात्रौ निद्रां न लेभिरे कदा द्रक्ष्यामहे राम
पीनकौशेयवाससं ३८ सर्वाभरणसंपन्नं किरीटकटकोज्ज्वलं कौस्तुभाभरणं श्यामं कंदर्प

रा५

59

रतसुंदरं ३९ अभिषिक्तं समायांतं गजारूढं स्मिताननं श्वेतछत्रधरं चैते लक्ष्मणं लक्ष्मणान्
वितं ४० एवं कदा वा द्रक्ष्यामः प्रभाते वा कदा भवेत् इत्युत्कंठधियः सर्वे बभूवुः पुरवासिनः ४१
नेदानीमुत्थितो राजा किमर्थं चेति चिंतयन् सुमंत्रः शनकैः प्रायाद्यत्र राजावतिष्ठते ४२ वर्द्ध
न्जयशब्देन प्रणमन् शिरसा नृप अतिखिन्नं नृपं दृष्ट्वा कैकेयीं समपृच्छत ४३ देवि कैकेयि
वर्द्धस्व किं राजा दृश्यते न्यथा नमो हे राजा रामेति दृशं न लब्धवान् ४४ राम रामेति रामेति रा
मतेवानुचिंतयन् प्रजागरेण वै राजा ह्यस्वस्थ इव लक्ष्यते राममानय शीघ्रं त्वं राजा द्रष्टुमिच्छ
ति ४५ सुमंत्र उवाच अश्रुत्वा राजवचनं कथं गच्छामि भामिनि तछ्रुत्वा मंत्रिणो वाक्यं
राजा मंत्रिणमब्रवीत् ४६ सुमंत्र रामं द्रक्ष्यामि शीघ्रमानय सुंदरं इत्युक्तस्त्वरितो गत्वा सुमं
त्रो राममंदिरं ४७ अवारितः प्रविष्टोयं त्वरितं राममब्रवीत् शीघ्रमागछ भद्रं ते राम राजीव
लोचनः ४८ पितुर्गेहं मया साध्ध राजा त्वां द्रष्टुमिच्छति इत्युक्तो रथमारुह्य संभ्रमात्त्वरितो य
यौ ४९ रामः सारथिना साध्ध लक्ष्मणेन समन्वितः मध्यकक्षे वशिष्ठादीन्पश्यन्नेव त्वरा
न्वितः ५० पितुः समीपं संगम्य ननाम चरणौ पितुः राममालिंगितुं राजा समुत्थाय ससं

केकेपि ५

रामः वात्सल्याद्रामेति दुःखान्नोच्चेयपोतुरः राजानं मूर्छितं दृष्ट्वा चुक्रुशुः सर्वयोषितः किम
र्थं रोदनं देवि मिति वसिष्ठोपि समाविशत् ५३ रामः पप्रच्छ किमिदं राज्ञो दुःखस्य कारणं एवं पृ
च्छति समे लोके कैकेयी राममब्रवीत् ५४ त्वमेक कारणं ह्यत्र राज्ञो दुःखोपशांतये किंचित्का
र्यं त्वया राम कर्त्तव्यं नृपतेर्हितं ५५ कुरु सत्यप्रतिज्ञ त्वं राजानं सत्यवादिनं राज्ञा वरद्वयं दत्तं
मम संतुष्टचेतसा ५६ त्वदधीनं तु तत्सर्वं वक्तुं त्वां लज्जते नृपः सत्यपाशेन संबद्धं पितरं त्रा
तुमर्हसि पुत्रशब्देन चैतद्धि नरकात्त्रायते पिता रामस्तयोदितं श्रुत्वा शूलेनाभिहतो य
था ५८ व्यथितः कैकयी माह किं मामेवं प्रभाषसे पित्रर्थे जीवितं दास्ये पिबेयं विषमुल्व
णं ५९ सीतां त्यक्ष्ये च कौशल्यां राज्यं चापि त्यजाम्यहं अनाज्ञप्तोपि कुरुते पितुः कार्यं स उ
त्तमः ६० उक्तः करोति यः पुत्रः स मध्यम उदाहृतः उक्तोपि कुरुते नैव स पुत्रो मल उच्यते ६१
अतः करोमि तत्सर्वं यन्मामाह पिता मम सत्यं सत्यं करोम्येव रामो द्विर्नाभिभाषते ६२ इति रामप्र
तिज्ञां सा श्रुत्वा वक्तुं प्रचक्रमे राम त्वदभिषेकार्थं संभाराः संभृताश्च ये ६३ तैरेव भरतोवश्यंम

भिषेच्यः प्रियो मम अपरेण वरेणाशु चीरवासा जटाधरः ६४ वनं प्रयाहि शीघ्रं त्वं मद्वचैर्वैपि
तुरा तथा चतुर्दश समास्तत्र वल्कलाजिनभोजनः ६५ एतद्देवपितुस्ते च कार्यं त्वं कर्तुम
र्हसि राजा तु लज्जितो वक्तुं त्वामेवं रघुनंदन ६६ श्रीराम उवाच भरतस्यैव राज्यं स्याद्दण्डका
मिदं डकान् किंतु राजा न वक्तीह मां न जानेऽत्र कारणं ६७ श्रुत्वैतद्रामवचनं दृष्ट्वा रामं पुरःस्थि
तं प्राह राज्ञो दशरथो दुःखितं दुःखितं वचः ६८ स्त्रीजितं भ्रांतहृदयं सुमार्गपरिवर्जितं निगृ
ह्य मां गृहाणेदं राज्यं पापं न तेद्भवेत् ६९ एवं चेदनृतं नैव मां स्पृशेद्रघुनंदन इत्युक्त्वा दुःखसंतप्तो
विललाप नृपस्तदा ७० हा राम हा जगन्नाथ हा मम प्राणवल्लभ मां विसृज्य कथं घोरं विपिनं
गंतुमर्हसि ७१ इति रामं समालिंग्य मुक्तकंठो रुरोद ह विमृज्य नयने रामः पितुः सचेलपाणिना ७२
आश्वासयामास नृपं शनैः सर्वकोविदः किमत्र दुःखेन विभो राज्यं शास्तु मेनुजः ७३ अहं प्रतिज्ञां
निस्तीर्य पुनर्यास्यामि ते पुरं राज्यात्कोटिगुणं सौख्यं मम राज्यं वने सतः ७४ त्वत्सत्यपालनं देव
कार्यं चापि भविष्यति कैकेय्याश्च प्रियो राजन्वनवासो महान् गुणः ७५ इदानीं गंतुमिच्छामि व्येतु
मातुश्च हृज्ज्वरः संभाराश्चोपह्रियंतामभिषेकार्थमागताः ७६ मातरं च समाश्वास्य अनुनीय

व प स ३१

(62)

च जानकी आगत्य पादौ वंदित्वा तत्र वा स्थेस्व स्व वनं ७७ इत्युक्तो नुपरिक्रम्य मातरं रद्दुमाययौ कौ
शल्यापि हरेः प्रज्ञां कर्तुं ते रामकारणात् ७८ होमं च कारयामास ब्राह्मणेभ्यो ददौ धनं ध्यायन्ती विष्णु
मेकाग्रमानसा मौनमास्थिता ७९ अनस्थिमेकं चनचित्र कारणं निरस्त सर्वातिशयस्वरूपं वि
ष्णुं स्तनेदमयं हृदस्थ्वेसा भावयंती नददर्श रामं ८० इति श्रीमदध्यात्मरामायणे अयोध्या
कांडे उमामहेश्वरसंवादे तृतीयः सर्गः ततः सुमित्रा दृष्ट्वैनं रामं राजीवसंभ्रमा कौशल्यां बो
धयामास राम उपसमुपस्थितः १ श्रुत्वैव रामनामैषा बाह्यदृष्टिमवाहता रामं दृष्ट्वा विशाला
क्षमालिंग्यांकेन्यवेशयत् २ मूर्ध्न्यवघ्राय पस्पर्श गात्रं नीलोत्पल छवि भुंक्ष्व पुत्रेति च प्राह मिष्ट
मन्नं क्षुधार्दितः ३ रामः प्राह न मे मातर्भोजनावसरः कुतः दंडकागमने शीघ्रं मम कालो ऽद्य निश्चि
तः ४ कैकेयी वरदानेन सत्यसंधः पिता मम भरताय ददौ राज्यं ममाप्यारण्यमुत्तमं ५ चतु
र्दश समाः स्तत्र ह्युषित्वा मुनिवेषधृक् आगमिष्ये पुनः शीघ्रं न चिंतां कर्तुमर्हसि ६ तच्छ्रुत्वा
सहसोद्विग्ना मूर्छिता पुनरुत्थिता आहरामं सुदुःखार्ता दुःखसागरसंप्लुता ७ यदि राम वनं स
त्यं यासि चेन्नय मामपि त्वद्विहीना क्षणार्धं वा जीवितं धारये कथं ८ यथा गौर्बालकं वत्सं

रकोनिष्टेन कुत्रचित् तथैव त्वां न शक्नोमि सर्वस्वं वा मयपछतु ९ त्वया किमपराद्धं हि कैके
य्या वा से कुं प्राणप्रियं सुतं १० भरताय प्रसन्नश्चेद्राज्यं रामाय पछतु किमर्थं वनवासाय पत्वा
मास प्रपाप्तिप्रियं ११ कैकेय्या वरदोराय नपस्यवा १२ पितागुरुर्यथाराम नवाहमधिकाततः
पित्रा रामं वनं गंतुं वारयेयमहं सुतं १३ यदि गच्छसि मद्वाक्यमुल्लंघ्य नृपवाक्यतः तदा प्राणा
न्परित्यज्य गच्छामि यमसादनं १४ लक्ष्मणोपि ततः श्रुत्वा कौशल्यावचनं रुषा उवाचेर
घ्ववं वीक्ष्य दहन्निव जगत्त्रयं १५ उन्मत्तं भ्रांतमनसं कैकेयीवशवर्तिनं वध्वा निहन्मि भर
तं तद्बंधून्मातुलानपि १६ अद्य पश्यंतु मे शौर्यं लोकान्महेदेनः पुरः रामस्त्वमभिषेकाय कु
रु यत्नमरिंदम १७ धनुष्पाणिरहं तत्र निहन्म्या विघ्नकारिणः इति ब्रुवंतं सौमित्रिमालिंग्य रघु
नंदनः १८ शूरोसि रघुसार्दुल ममात्यंतहिते रतः जानामि सर्वं ते सत्वं किंतु ते समयो न हि १९
६ यदिदं दृश्यते सर्वं राज्यं देहादिकं च यत् यदि सत्यं भवेत्तत्र आयासः सफलश्च ते २० भो
गा मेघवितानस्थविद्युल्लेखेव चंचलाः आयुरप्यग्निसंतप्तलोहस्थजलबिंदुवत् २१ यथा व्या
लगलस्थोपि भेको दंशानपेक्षते तथा कालाहिना ग्रस्तो लोको भोगानशाश्वतान् २२ करोति ३२

दुःखेन हि कर्म्मतंत्रं शरीरभोगार्थमहर्निशं नरः देहस्तु भिन्नः पुरुषात्समीक्ष्यते को वात्र भोगः पु
रुषेण भुज्यते २३ पितृमातृसुतभ्रातृदारबंध्वादिसंगमः प्रपायामिव जंतूनां नद्यां काष्ठौघवच्चलः
२४ छायेव लक्ष्मीश्चपला प्रतीता तारुण्यमंबूर्मिवदध्रुवं च स्वप्नोपमं स्त्रीसुखमायुरल्पं तथा
पि जंतोरभिमान एषः २५ संसृतिः स्वप्नसदृशी सदा रोगादिसंकुला गंधर्वनगरप्रख्या मू
ढस्तामनुवर्तते २६ आयुष्यं क्षीयते यस्मादादित्यस्य गतागतैः दृष्ट्वान्येषां जरामृत्यू क
थंचिन्नैव बुध्यते २७ स एव दिवसः सैव रात्रिरित्येव मूढधीः भोगाननुपतत्येव कालवेगं न
पश्यति २८ प्रतीक्षणं क्षरत्येतदायुरामघटांबुवत् सपत्ना इव रोगौघाः शरीरं प्रहरंत्यहो २९
जराव्याघ्रीव पुरतस्तर्जयंत्यवतिष्ठते मृत्युः सहैव यात्येषः समयं संप्रतीक्षते ३० देहेऽहंभावमा
पन्नो राजाहं लोकविश्रुतः इत्यस्मिन्मनुते जंतुः क्रिमिविड्भस्मसंज्ञिके ३१ त्वगस्थिमांसविण्
मूत्ररेतोरक्तादिसंयुतः विकारी परिणामी च देह आत्मा कथं वद ३२ यमास्थाय भवाल्लोकं द
ग्धुमिच्छति लक्ष्मण देहाभिमानिनः सर्वे दोषाः प्रादुर्भवंति हि ३३ देहोऽहमिति या बुद्धिरविद्या सा

प्रकीर्तितः नाहं देहश्चिदात्मेति बुद्धिर्विद्येति भण्यते ३४ अविद्या संसृतेर्हेतुर्विद्या तस्या निवर्ति
का तस्माद्यत्नः सदा कार्यो विद्याभ्यासे मुमुक्षुभिः ३५ कामक्रोधादयस्तत्र शत्रवः शत्रुसू
दन तत्रापि क्रोध एवालं मोक्षविघ्नाय सर्वदा ३६ येनाविष्टः पुमान् हन्ति पितृभ्रातृसुहृत्सखीन्
क्रोधमूलो मनस्तापः क्रोधः संसारबन्धनः ३७ धर्मक्षयकरः क्रोधस्तस्मात्क्रोधं परित्यजेत् क्रो
ध एष महान् शत्रुस्तृष्णा वैतरणी नदी ३८ संतोषो नन्दनवनं शान्तिरेव हि कामधुक् तस्माच्छान्तिं ने
भजस्वाद्य शत्रुरेवं भवेन्न ते देहेन्द्रियमनःप्राणबुद्ध्यादिभ्यो विलक्षणः ३९ आत्मा शुद्धः स्वयंज्योति
रविकारी निराकृतिः यावद्देहेन्द्रियप्राणैर्भिन्नात्वं नात्मनो विदुः ४० तावत्संसारदुःखौघैः पी
ड्यन्ते मृत्युसंयुताः तस्मात्त्वं सर्वदा भिन्नमात्मानं हृदि भावय ४१ बुद्ध्यादिभ्यो बहिः सर्व
मनुवर्तस्व माखिदः भुंजन्प्रारब्धमखिलं सुखं वा दुःखमेव वा ४२ प्रवाहपतितः कार्यं कुर्वन्न
पि न लिप्यते बाह्ये सर्वत्र कर्तृत्वमावहन्नपि राघव ४३ अन्तः शुद्धस्वभावस्त्वं लिप्यसे न च क
र्मभिः एतन्मयोदितं सर्वं हृदि भावय सर्वदा ४४ संसारदुःखैरखिलैर्बाध्यसे न कदाचन त्वम ३२

66

दि ध्येयं मयाभीष्टं हृदि भावयता सदा ४४ समागमं प्रतीक्षस्व च न दुःखेषु सीद चिरं न स देवकार्यसंबा
न्धः कर्मभोगानुवर्तिनां ४५ यथा प्रवाहपतितप्लवानां सरितां तथा चतुर्दश समा संख्याः क्षणार्ध
मिव जायते ४६ अनुभूयस्व मामेव दुःखं सत्यमदूरतः एवं चेत्सुखसंवास भविष्यति वने मम ·
· ४७ इत्युक्त्वा दंडकां तु पादयोः पतितं चिरं उत्थाप्यांके समावेश्य आशीर्भिरभिनंदयत् ४८
तु सर्वे देवाः सगंधर्वा ब्रह्माविष्णुशिवादयः रक्षंतु सर्वदा पांतु निष्टं तं निद्रया युतं ५० इति प्रस्थाय पया
मासं समालिंग्य पुनः पुनः लक्ष्मणोऽपि प्रदाराम नत्वा हर्षाश्रुगद्गदः ५१ आह राम महामांतस्थः संश
यो पंचवपाहतः पास्यामि पृष्टो रामसेवा कर्तुं न दादिश ५२ अनुगच्छामि स्वं मां राम नो चेत्प्राणांस्त्य
जाम्यहं तथेति राघवोप्याह लक्ष्मणं याहि मा चिरं ५३ प्रतस्थे तौ समाप्यानुगतः सीतापतिर्विभुः
आगतिं पतिमालोक्य सीता सस्मितभाषिणी ५४ स्वर्णपात्रस्थसलिलैः पादौ प्रक्षाल्य भक्ति
गुरु तः प्रदक्षिणपतिमालोक्य देवकिं सेनया विना ५५ आगतोसि गतोः कुत्र श्वेतछत्रं च ते कुतः
श्री: वादित्राणि किरीटादि विवर्जितः ५६ समेत रामजः सहितः संभ्रमं मा गतोसि किं इति स्म सी

३४

तया पृष्टो रामः सस्मितमब्रवीत् । रक्षोमे दंडकारण्ये राज्यं दत्तं श्रियामेखिलं । अतस्तत्पाल-
नार्थाय शीघ्रं यास्यामि भामिनि । अद्यैव यास्यावनं त्वं तु श्वश्रूसमीपगा । शुश्रूषां कु-
रु मे मातुर्न मिथ्यावादिनो वयं । इति ब्रुवंतं रामं सीता भीताब्रवीद्वचः । किमर्थं न च राज्यं ते
पित्रा दत्तं महात्मना । तामाह रामः कैकेय्यै राजा प्रीतो वरं ददौ । भरताय ददौ राज्यं वनवासं ममानघे
चतुर्दश समास्तत्र वासो मे कल्पितः । तया देव्या ददौ राजा सत्यवादी दयापरः । अतः शीघ्रं
गमिष्यामि विघ्नं मा कुरु भामिनि । श्रुत्वा तद्रामवचनं जानकी प्रीतिसंयुता । अहमग्रे गमिष्या-
मि वनं पश्चात्त्वमेष्यसि । इत्याह मां विना गंतुं न वनं एव चोचितं । तामाह राघवः प्रीतः स्वप्रियां प्रि-
यवादिनीं । कथं वनं त्वां नेष्येहं बहुव्याघ्रमृगाकुलं । राक्षसा घोररूपाश्च संति मानुषभोजिनः ।
सिंहव्याघ्रवराहाश्च संचरंति समंततः । कंदमूलफलं मृद भोजनार्थं सुमध्यमे । अपूपानि
व्यंजनानि विद्यंते न कदाचन । काले काले फलं चापि विद्यते कुत्र सुंदरि । मार्गो न दृश्यते क्वापि श-
र्कराकंटकान्वितः । गुहागह्वरसंबाधं झिल्लीदंशादिभिर्युतं । एवं बहुविधं दोषं वनं दंडकसंज्ञकं । या

श्री

ल

३४

पा सी

द्वारेण गतवंशीतवानानीस्मिन् राक्षसादीन्च नेदृष्ट्वा जीवितं हास्यसे चिरात् तस्माद्गृहे
तिष्ठं शीघ्रं द्रक्ष्यसि मां पुनः एतस्य वचनं श्रुत्वा सीता दुःखसमन्विता प्रत्युवाच स्फुर
द्वक्त्रा किंचित्कोपसमन्विता कथं मामिच्छसे सक्तुं धर्मपत्नीं पतिव्रतां त्वदन्येन न्यामदे
षां मां धर्मसौदृश्यापर त्वत्समीपे स्थितां राम को वा मां धर्षयेद्वने फलमूलादिकं यच्च त्वत्र भु
क्तावशेषितं तदेवामृततुल्यं मे तेन तुष्टा रमाम्यहं त्वया सह चरन्त्या मे कुशाः काशाश्च कं
टकाः पुष्पास्तरणतुल्या मे भविष्यन्ति न संशयः अहं त्वां क्लेशये नैव भवेयं कार्यसाधनी
बाल्ये मां वीक्ष्य कश्चिद्दैवज्ञो ज्योतिःशास्त्रविशारदः प्राह ते विपिने वासः पत्या सह भविष्यति स
त्यवादी द्विजो भूयाद्गमिष्यामि त्वया सह अन्यत्किंचित्प्रवक्ष्यामि श्रुत्वा मानकाननं रामा
यणानि बहुशः श्रुत्वा निवृत्तो भिर्द्विजैः सीतां विना वने रामो गतः किं कुत्रचिद्वद अतः त्व
या गमिष्यामि सर्वथा त्वत्सहायिनी यदि गच्छसि मां सक्त्वा प्राणांस्त्यक्ष्यामि ते गते इति तन्नि
श्चयं ज्ञात्वा सितया रघुनंदनः अब्रवीद्देवि गच्छ त्वं वने शीघ्रं मया सह अहं धैर्य प्रयच्छ

३५

शृङ्गाराण्याभरणानि च ब्राह्मणेभ्यो धनं सर्वं दत्वा गच्छाम हे वनं इत्युक्तो लक्ष्मणेनैव राघवेणैना
त्युपभोक्ष्यतः ददौ गवां दशशतं धनानि वस्त्राणि वस्त्राणि दिव्यानि विभूषणानि कुटुंबवत्या
श्रुतशीलवद्भ्यश्च दारिद्रे जेभ्योऽरण्यं वंशकेतुः अरुंधत्यै ददौ सीता मुख्यान्याभरणानि च रामो
मातुः सेवकेभ्यो ददौ धनमनेकधा स्वकालः पुरवासिभ्यः सेवकेभ्यस्तथैव च पौरजान
पदेभ्यश्च ब्राह्मणेभ्यः सहस्रशः लक्ष्मणोपि सुमित्रां तु कौशल्यामेव समर्चयत् धनुःपाणिः
समागत्य रामस्याग्रे व्यवस्थितः रामः सीता लक्ष्मणश्च जग्मुः सर्वं नृपालयं श्रीरामः सह
सीतया च पथा गच्छन् शनैः सानुजः पौरान् जानपदान् कुतूहलदृशः सोऽदर्शद्दीक्षयन्नेत्रपमः
कामसहस्रसुंदरवपुः कौसल्यादिशोभासपत्न्या दत्यास पवित्रिताखिल जनगण्यापालयंतपितु इ
ति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकांडे चतुर्थः सर्गः ४ आयांतं ना
गरा दृष्ट्वा मार्गे रामं सजानुकिं लक्ष्मणेन समावीक्ष्य ऊचुः सर्वे परस्परं १ कैकेय्या वरदानादि
कृत्या दुःखसमाकुलाः वनराजो दशरथो सहसा संप्रविशन्ते २ स्त्रीहेतोरसज्जन्कामीन

तं

रं

स्यसंस्तवाकुलः कैकेयीवाक्यं दृष्ट्वा रामस्याप्रियंकरं ३ विवासयामास कथं क्रूरकर्मा
निमठधीः हे जनाना चवस्तव्यं गंतुमे षेव कानने ४ यत्र रामः सभार्यश्च सानुजो गंतु
मिच्छति यद्यपंतु जानकी सर्वे पादचारेण गच्छति ५ पुंभिः कदाचिदृष्टा वा जानकी लोकसुं
दरी सापि देशादेन गच्छतीतिन संचिंतयनादृता ६ रामोपि पादचारेण गजाश्वादि विवर्जितः
गच्छति दृष्टपथा विभुं सर्वलोकैकसेतुके दरं ७ राक्षसी कैकयी नाम्नी जाता सर्व विनाशिनी रामस्या
पि भवेद्दुःखं सीतायाः पादयानतः ८ बलवान्विधिरेवात्र समयज्ञो हि दुर्बलः इति दुःखातुरे वृंदे
साधूनां मुनिपुंगवः ९ अब्रवीद्वामदेवोथ साधूनां संघमध्यमः मानुषेषु च यद्रामं वासीना
वर्चितलक्षनः १० एष रामः परो विष्णुरादिनारायणः स्मृतः। एषा सा जानकी लक्ष्मीर्योगमायेति
विश्रुता ११ आसीच्छेषस्तु मन्येति लक्ष्मणाख्यः ससामतं एषा माया गुणैर्युक्ता सदा कारवाणि
च १२ एष एव रजोयुक्तो ब्रह्माभूद्विश्वभावनः सत्वाविष्टस्तथा विष्णुस्तिष्ठन् जगत्परिपालकः १३
एष रुद्रस्तामसीनो जगत्प्रलयकारणं एष मत्स्यः पुरा भूत्वा भक्तवैनस्वनंमनुं १४ नाव्यारोप्य

लयस्यांते पालयामास राघवः समुद्रमथनमथने पूर्वं मंदरे सुतलं गते १५ आधारपत्वपष्टेद्धृ कूर्मरूपी रघूत्तमः महीरसातलं याता मलये सूकरो भवत् १६ नीलया मास दंष्ट्राग्रेनां क्षोणिं रघुनंदनः नारसिंहवपुः स्वाम प्रल्हादवरदः पुरा १७ त्रिलोकीकंटकं रक्षः पाटयामास नखरैः पुत्र एज्यं हतं दृष्ट्वा स्वदिसायाचितः पुरा १८ वामनत्वमुपागम्याग्रौ यश्च यात्काहरस्तुनः दुष्टक्षत्रियभूभारनिरसे भार्गवो भवत् १९ स एव जगतां नाथ इदानीं रमना गतः रावणादिनिरक्षांसि कोटिशो निहनिष्यति २० मानुषेणैव मरणं तस्य दृष्टं दुरात्मनः एतादृशे रक्षो नापि तपसाराधितो हरिः २१ पुत्रत्वं कौसल्याया विप्रमुनेदापुत्रो भवद्धरिः स एव विष्णुः श्रीरामो रावणादिवधाय हि २२ गंताद्यैव वनं रामो लक्ष्मणेन सहाप्रभान् एषा सीता हरेर्माया सृष्टिस्थित्यंतकारिणी २३ राजा वा कैकयी वापि नात्र कारणमप्वपि पूर्वेद्युर्नारदः प्राह भूभारहरणाय वै २४ रामोप्याह स्वःदंडकारण्यं गमिष्याम्यहं वने अतो रामोदिस्य चिंता संजनवालिशाः २५ रामराजितयोनिः संजप्य नित्यं मनुजा विभु नेषां मृत्युभयादिनि न भवंति कदाचन २६ कीं पुनस्तस्य रा

का

म३

राम

मस्य दुःखशंका महात्मनः रामनाम्नैव मुक्तिः स्यात्कलौ नान्येन केनचित् २७ मायामानु
षरूपेण विडंबयति लोककृत् भक्तानां भजनार्थाय रावणस्य वधाय च २८ रामस्त्वाभीष्ट
सिध्यर्थं मानुषं वपुराश्रितः इत्युक्त्वा विरमाथ वामदेवो महामुनिः २९ श्रुत्वा तेपि द्विजाः सर्वे
रामं सत्वा हरिं विभुः जहुर्दुःखं स्वयं स्थिं राममेवान्वचिंतयन् ३० यदिदं चिंतयेन्नित्यं रहस्य
रामसीतयोः तस्य रामः सुदृढं भक्तिं भवेद्विज्ञानपूर्वकं ३१ रहस्यं गोपनीयं वो यूपवै राघव
प्रियाः इत्युक्त्वा प्रययौ विप्रास्तेपि रामं परं विदुः ३२ ततो रामः समाविश्य पितृगेहमवारितः
सानुजः सीतया गत्वा कैकेयीमिदमब्रवीत् ३३ श्रीराम उवाच अंगनास्मो वयं मानस्वपले
सुमंतवनं गंतुस्त्वं नृपः शीघ्रं मा तापयतु नः पिता ३४ इत्युक्त्वा सहसोत्थाय चीराणि प्रददौ स्वयं
रामाय लक्ष्मणायाथ सीतायै च पृथक् पृथक् ३५ रामस्तु वस्त्राण्युत्सृज्य वन्याचीराणि पर्यधात्
लक्ष्मणोपि तथा चक्रे सीता तन्न विजानती ३६ हस्ते गृहीत्वा रामस्य लज्जया मुखमैक्षत रामो गृही
त्वा तच्चीरमंशुके परिवेष्टयेत् ३७ तद्दृष्ट्वा रुरुदुः सर्वे राजदाराः समंततः वसिष्ठस्तु तदाकर्ण्य हृदितोम

र्ययन्त्रुषा ३८ कैकेयीप्राह दुर्बुद्धे राम सत्यव्रताच्चतः वनवासाय दुष्टे त्वं सीतायै किं प्रयच्छसि ३९ यदि
रामसमं त्वेति सीता भक्त्या पतिव्रता दिव्यांबरधराणि संसत्त्वा भरणभूषिता ४० रामय त्वं निशं रामं व
नदुःखनिवारिणी राजा दशरथः प्राह सुमंत्रं रथमानय रथमारुह्य गच्छंतु वनं वनचरप्रियाः इत्यु
क्तो राममालोक्य सीतां चैव सलक्ष्मणं ४२ दुःखान्निपतितो भूमौ रुरोदाश्रुपरिप्लुतः आरुरोह रथं
सीता सीतादं रामस्य पश्यतः ४३ रामप्रदक्षिणीकृत्वा पितरं रथमारुहत् लक्ष्मणः खड्गयुगलं धनुस्तूणीयुगं धा ४४
गृहीत्वा रथमारुह्य नोदयामास सारथिं तिष्ठ तिष्ठ सुमंत्रेति राजा दशरथोऽब्रवीत् ४५ गच्छ गच्छेति
रामेण नोदितो चोदयद्रथं रामे दूरं गते राजा मूर्छितः प्रापतद्भुवि ४६ पौराश्च बालवृद्धाश्च वृद्ध
ब्राह्मणसत्तमाः तिष्ठ तिष्ठेति रामेति क्रोशंतो रथमन्वयुः ४७ राजा रुदित्वा सुचिरं मा नयंतु गृहं म
ति कौशल्याया राममातुः सह परिचारकान् ४८ किंचित्कालं भवेत्तत्र जीवनं दुःखितस्य मे
रामं तु दृष्ट्वा जीवामि चिरं रामं विना ह्यतं ४९ ततो गृहं प्रविश्यैव कौशल्यायाः पपात ह मूर्छितश्चापि र
दुःखात्तु तूष्णीमेवावतस्थिवान् ५० रामस्तु तमसातीरं गत्वा तत्रावसत्सुखी गतं श्यनिराहारो वृक्ष
मूलं स्वपेतं दिभुः ५१ सीतया सह धर्मात्मा धनुःपाणिस्तु लक्ष्मणः पालयामास धर्मतः सुमंत्रेण सम

३८

न्वितः पौरास्ते सर्वे समगत्यस्थितास्तस्याविदूरतः रामरामं पुरं नेतुं नो चेद्गच्छाम ते वनं ५३ इति निश्च
यमातायनेषां रामोति विस्मितः नाहं गच्छामि नगरं मेने नैव वैकेकैयी भागिनः ५४ भविष्यंतीति नि
श्चित्य सुमंत्रमिदमब्रवीत् इदानीमेव गच्छामः सुमंत्र रथमानय ५५ इत्युक्तः सुमंत्रोपि रथं वा
हैर्योजयत् आरुह्य रामः सीता च लक्ष्मणोपि च मुहूर्ते ५६ अयोध्याभिमुखं गत्वा किंचिद्दूरेण
तोययुः तेपि राममदृष्ट्वैव प्रातः शापदुःखिताः ५७ रथनेमिगतं मार्गं पश्यंतस्ते पुरं ययुः हृ
दि रामं ससीतं ते ध्यायंतस्तस्थुरन्वहं ५८ सुमंत्रोपि रथं शीघ्रं तोदयामास सादरं सुकीनानूजन
पदान्पश्यन् रामः सीतासमन्वितः ५९ गंगातीरे समागच्छच्छृंगिवेराविदूरतः गंगां दृष्ट्वा नम
स्कृत्य स्नात्वा सानंदमानसः शिंशपावृक्षमूले स निषसाद रघूत्तमः तामो गुहो जनैः श्रुत्वा राममागम
महोत्सवं ६१ सखायं स्वामिनं द्रष्टुं हर्षात्तूर्णं समापतत् फलानि मधुपुष्पादि गृहीत्वा भक्तिसंयु
तः ६२ रामस्याग्रे विनिक्षिप्य दंडवत्प्रापतद्भुवि राम उत्थाप्य तं तूर्णं राघवः परिषस्वजे ६३ सं
पृष्टकुशलो रामं गुहः प्रांजलिरब्रवीत् धन्योहमद्य मे जन्म नैषादं लोकपावनं ६४ बभूवय

३८

रमेमंदः स्वक्षातेंगंधुनंदनः नैणाशोऽन्यमेजनेतुकिंकरस्परघुजमः ६५ त्वदधीनंवसंन्तचपालया
मान्रघूद्वह आगछयामोनगरंपावनंकुरुमेगृहं ६६ गृहाणफलमूलानित्वदर्थंसंचितानि
मे अनुकूलोभगवन्दासलेहंस्तेजम ६७ एमलमाहस्पीतोवचनंश्रुणुमेसखे नवेक्ष्यामि
गृहंग्रामंवर्षाणिनवपंच ६८ दत्तमन्येननोभुंजेफलमूलादिकंचन एम्पंमभैतत्तेसर्वंवंसत्वामे
निवछभः ६९ वटक्षीरंसमानाप्यजटामुकुटमादरात् ववंधलक्ष्मणेनाथसहितोरघुनंदनः ७०
जलमात्रंतुसंप्राश्यसीतायासहराघवः आस्तृतेकुशपाणाद्यैः शयनंलक्ष्मणेनहि ७१ उवासतत्र
नगरेप्रासादाग्रेयथापुरा सुष्वापतत्रवैदेहीसंपर्यंकइवसंस्कृते ७२ ततोविदूरेपरिगृह्यचापंसबा
णतुणीरघुरःसलक्ष्मणः ररक्षरामंपरितोविपश्यन्गुहेनसार्द्धंसशरासनेन ७३ इतिश्रीमद
ध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेपंचमःसर्गः ५ सुप्तंरामंसमालोक्यगुहः
साश्रुपरिप्लुतः लक्ष्मणंप्राहविनयाद्भ्रातःपश्यसिराघवं १ शयानंकुशपात्रौघसंस्तरेसीतयासह
यःशेतेस्वर्णपर्यंकेस्वास्तीर्णेभवनोत्तमे २ कैकेयीरामदुःखस्यकारणंविधिनाकृता मंथरा
बुद्धिमास्थायकैकेयीपापमाचरत् ३ तच्छ्रुत्वालक्ष्मणःप्राहसखेशृणुवचोमम कःकस्यहेतुर्दुः

च

धा

रा

३८

खस्य कश्च हेतुः सुखस्य वा ४ स्वपूर्वार्जितकर्मैव कारणं सुखदुःखयोः ५ सुखस्य दुःखस्य न
कोऽपि दाता परो ददातीति कुबुद्धिरेषा अहं करोमीति वृथाभिमानः स्वकर्मसूत्रग्रथितो हि लो
कः ६ सुहृन्मित्रार्युदासीनद्वेष्यमध्यस्थबान्धवाः ६ स्वयमेवाचरन्कर्म तथा तत्र विभाव्य
ख ते ७ सुखं वा यदि वा दुःखं स्वकर्मवशगो नरः यद्यद्यथागतं तत्तद्भुक्त्वा स्वस्थमना भवेत् ८
न मे भोगागमे वांछा न मे भोगविवर्जने आगच्छत्वथ मागच्छत्वभोगवशगो भवेत् ९ यस्मि
न्देशे च काले च यस्माद्वा येन केन वा कृतं शुभाशुभं कर्म भोज्यं तत्तत्र नान्यथा १० अलं ह
र्षविषादाभ्यां शुभाशुभफलोदये विधात्रा विहितं यद्यत्तदलंघ्यं सुरासुरैः ११ सर्वदा सुखदुःखा
भ्यां नरः प्रत्यनुरुध्यते शरीरं पुण्यपापाभ्यामुत्पन्नं सुखदुःखवत् १२ सुखस्यानन्तरं दुःखं दुःखस्यानं
तरं सुखं द्वयमेतद्धि जंतूनामलंघ्यं दिनरात्रिवत् १३ सुखमध्ये स्थितं दुःखं दुःखमध्ये स्थितं सु
खं द्वयमन्योन्यसंयुक्तं प्रोच्यते जलपंकवत् १४ तस्माद्धैर्येण विद्वांस इष्टानिष्टोपपत्तिषु न हृष्यं
ये ति न मुह्यंति सर्वं मायेति भावनात् गुहलक्ष्मणयोरेवं भाषतोर्विमलं नभः बभूव रामः सलिलं

77

३९

स्वच्छात्मानः समाहितः १६ उवाच रामः संदृष्टां नावमानयसे स्वरे श्रुत्वा रामस्य वचनं निषादाधिपति
